# READER - I
## (SAMSKRITA PRATAMA DARSA)

॥ विद्यया विन्दते अमृतम् ॥

# Sanskrit Study Made Easy Series

A Reformed Series of Four Illustrated Sanskrit Readers
With Grammatical & Conversational Exercises,
Glossary etc.,
For a Pleasant & Quick Study of Sanskrit.

Most widely used throughout India and Foreign Countries
Viz: Ceylon, Siam, Bangkok, Germany, Italy, Australia
California, San Francisco, etc.,

# अनुक्रमणिका—CONTENTS


| | | | पृष्ठम् |
|---|---|---|---|
| १. | सूर्यः प्रत्यक्षदेवता | .... | १ |
| २. | उद्यमः कार्यसाधकः | .... | ५ |
| ३. | गोदोहः | .... | ८ |
| ४. | स्वयङ्कृतोऽनर्थः | .... | ११ |
| ५. | श्रीरामपट्टाभिषेकः (पद्यपाठः) | .... | १४ |
| ६. | अश्वः | .... | १८ |
| ७. | शृगालस्य कौशलम् | .... | २१ |
| ८. | व्याघ्रचित्रकौ | .... | २४ |
| ९. | अश्वसारङ्गयोः कथा | .... | २७ |
| १०. | कोकिलः (पद्यपाठः) | .... | ३० |
| ११. | कूपः | .... | ३३ |
| १२. | वानरक्रीडा | .... | ३६ |
| १३. | मयूरः | .... | ४० |
| १४. | मृगाणां पक्षिणां च समयः | .... | ४३ |
| १५. | प्रश्नोत्तरमाला (पद्यपाठः) | .... | ४६ |
| १६. | शुकः | .... | ४८ |
| १७. | उलूखलं मर्दलश्च | .... | ५१ |
| १८. | गजः | .... | ५४ |
| १९. | दश मूढाः | .... | ५७ |

| | | | पृष्ठम् |
|---|---|---|---|
| २०. | कुक्कुटो रत्नं च (पद्यपाठः) | .... | ६० |
| २१. | मातापुत्रयोः संभाषणम् | .... | ६२ |
| २२. | चोरो बालकः | .... | ६६ |
| २३. | मूर्खस्योपकारो न कर्तव्यः | .... | ७० |
| २४. | जरासन्धः | .... | ७३ |
| २५. | चन्द्रोदयः (पद्यपाठः) | .... | ७७ |
| २६. | पितापुत्रयोः संभाषणम् | .... | ७९ |
| २७. | महाकविः श्रीकालिदासः | .... | ८३ |
| २८. | सीताविवाहः | .... | ८७ |
| २९. | विरक्तः महर्षिः | .... | ९० |
| ३०. | चित्रश्लोकाः (पद्यपाठः) | .... | ९३ |
| ३१. | काकोलूकीयम् | .... | ९६ |
| ३२. | फलानि | .... | १०० |
| ३३. | लक्ष्मणस्य प्रस्थानम् | .... | १०३ |
| ३४. | भूमिः | .... | १०६ |
| ३५. | नीतिमाला—प्रथमो भागः (पद्यपाठः) | .... | १११ |
| | ,, द्वितीयो भागः ,, | .... | ११३ |
| | ,, तृतीयो भागः ,, | .... | ११५ |
| ३६. | पर्यायपदानाम् अनुक्रमणिका | .... | ११७ |
| ३७. | Appendix | .... | ११९ |

॥ श्रीरामजयम् ॥

॥ विद्यया विन्दते अमृतम् ॥

# ॥ संस्कृतप्रथमादर्शः ॥



## १. सूर्यः प्रत्यक्षदेवता।

पश्य, पूर्वस्यां दिशि सूर्य उदयते। तस्य प्रकाशः संप्रति रक्तः कोमलश्च वर्तते। सूर्यः उदयमानोऽन्धकारं नाशयति, प्राणिनः प्रबोधयति, कुसुमानि च विकासयति। सन्तो बालाः सूर्योदयात् पूर्वम् उषसि प्रबुध्य स्वीयान् पाठान् पठन्ति ॥

यदा सूर्यः क्रमेणोद्गच्छन् नभसो मध्यमारोहति तदा 'मध्याह्नः'। मध्याह्नात् पूर्वो भागः 'पूर्वाह्णः,' अपरो भागः 'अपराह्णः'। मध्याह्ने सूर्यस्य प्रकाशः कठोरो भवति। अपराह्णे सूर्यः क्रमेण पश्चिमां दिशमवतरति, तस्याम् अस्तं च गच्छति। अस्तमये भूयोऽपि तस्य प्रकाशो रक्तः कोमलश्च भवति ॥

सूर्यस्य भासा सर्वा सृष्टिः प्रकाशते। सूर्येण तुल्यो नान्यस्तेजस्वी वर्तते। सूर्यः प्रत्यक्षदेवता ॥

सूर्योपासनया जनाः अरोगाः भवन्ति। 'आरोग्यं भास्करात् इच्छेत्' इति हि महतां वचनम्। सः देवैः असुरैश्च नमस्कृतः ॥

तथा च श्रीमद्वाल्मीकिरामायणे आदित्यहृदयस्तोत्रम्—

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम्।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥

तस्मात् त्वमपि तं नमस्कुरु ॥

---

१) प्रश्नाः—१. सूर्यः कस्यां दिशि उदयते? २. स उदयमानः किं करोति? ३. सन्तो बालाः कदा प्रबुध्य किं कुर्वन्ति? ४. अपराह्णे सूर्यः किं करोति? ५. प्रभाते, मध्याह्ने, सायाह्ने च सूर्यस्य प्रकाशः कीदृशो भवति? ६. कया सर्वा सृष्टिः प्रकाशते?

७. कदा अस्तमयः जायते ? ८. जनः कथम् अरोगः भवति ? ९. महान्तः किं वदन्ति ? १०. कीदृशं भास्करं जनाः पूजयन्ति ?

२) In grammar सन्धि means the change in combination of 2 letters coming in immediate contact.

**विसर्ग लोप सन्धिः** (In this सन्धि the Visarga is dropped.)

सूर्यः + उदयते = सूर्य उदयते

रामः + आयाति = राम आयाति

चन्द्रः + इव = चन्द्र इव

भृत्यः + एति = भृत्य एति

बालाः + धावन्ति = बाला धावन्ति

गजाः + गच्छन्ति = गजा गच्छन्ति

३) नाशयति, प्रबोधयति, विकासयति-इमे 'णिजन्ताः' (causals)

एषां प्राथमिकरूपाणि—नश्यति, प्रबुध्यते, विकसति ॥

४) पर्यायाः = समानार्थ शब्दाः (Synonyms)

सूर्यः ३७—सूरसूर्यार्यमादित्य द्वादशात्मदिवाकराः ।
भास्कराहस्करब्रध्न प्रभाकरविभाकराः ॥ १
(Sun) भास्वद्विवस्वत्सप्ताश्व हरिदश्वोष्णरश्मयः ।
विकर्तनार्कमार्ताण्ड मिहिरारुणपूषणः ॥ २
द्युमणिस्तरणिर्मित्रः चित्रभानुर्विरोचनः
विभावसुर्ग्रहपतिः त्विषां पतिरहर्पतिः ।
भानुर्हंसः सहस्रांशुः तपनः सविता रविः ॥ ३

## शब्दार्थकोशः—GLOSSARY

प्रत्यक्षदेवता *a. f.* visible
दिश् *f.* direction
पूर्वा *a. f.* the East
पश्चिमा *a. f.* the West
उदयते A. rises
कोमल *m.* pretty
अन्धकार *m.* darkness
उषस् *n.* dawn
पूर्वाह्ण *m.* fore-noon
मध्याह्न *m.* mid-day
अपराह्ण *m.* after-noon
अवतरति *P.* descends
भास् *f.* light
सृष्टि *f.* creation
तेजस्विन् *a. m.* bright
उपासनया *f.* by worship
रश्मिवत् *a. m* having rays
क्रमेण *m.* gradually
समुद्यत् *n. m.* rising

श्रीमद्वाल्मीकि रामायण the mighty Epic composed by the Sage वाल्मीकि in Seven काण्डs containing 24 thousand slokas.

---

## ABBREVIATIONS USED

*N.* Noun विशेष्यम्
*a.* adjective विशेषणम् (can be used in all the 3 genders)
*m.* Masculine पुंलिङ्गम्
*f.* Feminine स्त्रीलिङ्गम्
*n.* Neuter नपुंसकलिङ्गम्
*P.* परस्मैपदी
*A.* आत्मनेपदी
*U.* उभयपदी
*in.* Indeclinable अव्ययम्

---

Note that the पर्याय श्लोकाs in all Lessons are taken from अमरकोश



## २. उद्यमः कार्यसाधकः

वर्षासु शाकटिकः कश्चित् स्वशकटे भाण्डान्यारोप्य तं नगरान्तरमनयत्। द्वौ वृषौ तं शकटम् अवहताम्। रथ्यायां पङ्के शकटस्य चक्रं रुद्धमभूत्। वृषभौ बलवत् प्रहरन्नपि स शकटं चलयितुं नाक्षमत॥

ततः स भगवन्तं नारायणं प्रति चुक्रोश। तस्याक्रोशं श्रुत्वा दयालुर्भगवांस्तस्य पुरस्तादाविरभूत्। अभाषत च शाकटिकम्—'भो मूढ! किमिति जोषमास्से? मम साहाय्यं वाञ्छसि चेत् उत्तिष्ठ! धुर्यौ चोदय, चक्रं स्कन्धेन प्रचालय। एवं कृतेऽहं ते सहाय्यं करिष्यामि'—इति। एवमुक्त्वा भगवान् अन्तर्धानमकरोत्॥

ततः शाकटिकेन तथा कृते भगवतः साहाय्येन शकटं पङ्कान्निरगच्छत् । यात्रा च शाकटिकस्य निर्विघ्नाऽभूत् ॥

---

१) प्रश्नाः—

१. शाकटिकः कदा कुत्र शकटमनयत् ? २. कुतः शाकटिकः शकटं चलयितुं नाक्षमत ? ३. ततः स किमकरोत् ? ४. भगवान् किमभाषत शाकटिकम् ? ५. कदा केन कारणेन शकटं पङ्कात् निरगात् ?

२) 'अकार लोप' सन्धिः—

In this सन्धि 'अ' of the next word is dropped. To indicate this in the place of 'अ' the sign 'ऽ' 'अवग्रह' is added.

कृते + अहम् = कृतेऽहम् । ते + अत्र = तेऽत्र ।

विष्णो + अव = विष्णोऽव । एते + अवदन् = एतेऽवदन् ।

२. ह्रस्वाकारस्य विसर्गस्य च प्रथमम् 'ओकारो' भवति, तदनन्तरं अकार लोप सन्धिः—

ईश्वरः + अवति = ईश्वरोऽवति ।

सः + अहसत् = सोऽहसत् ।

एषः + अवदत् = एषोऽवदत् ॥

३) णिजन्तरूपैः वाक्यानि पूरयत—

१) प्रभाते पिता पुत्रं (प्रबुध्) २) माता शिशुं क्षीरं (पा)

३) गुरुः बालान् पाठं (पठ्) ४) शकटं जनान् नगरं (प्राप्)

४) दृश्, क्रीड्, कृ एषां णिजन्तैः रूपैः वाक्यानि रचयत ॥

५) पर्यायाः—

भाण्डम् ऽ—सर्वमावपन भाण्डं पात्रामत्रं च भाजनम्

जोषम् २ किं २—तूष्णीमर्थे सुखे जोषं किं पृच्छायां जुगुप्सने ।

माता ५ (mother) जनयित्री प्रसूर्माता जननी ॥

---

**उद्यमः कार्यसाधकः** efforts lead to the goal

**भाण्डानि** *n.* wares, goods
**नगरान्तर** *n.* another town
**रथ्या** *f.* a road
**पङ्क** *n.* mud, mire
**रुद्ध** *a. n.* obstructed
**बलवत्** *in.* severely
**अक्षमत** *A.* was able
**चुक्रोश** *P.* cried
**दयालु** *a. m.* kind
**भगवत्** *m.* glorious
**पुरस्तात्** *in.* in front
**आविरभूत्** *P.* became manifest
**अभाषत** *A.* spoke
**जोषं** *in.* / **आस्से** *A.* } are keeping idle
**साहाय्यम्** *n.* assistance
**वाञ्छसि** *P.* crave. wish
**धुर्य** *m.* bullock, also horse
**चोदय** *P.* drive
**स्कन्ध** *m*, shoulder
**प्रचालय** *P.* push
**अन्तर्धानम्** / **अकरोत्** *P.* } disappeared
**निरगच्छत्** *P.* came out

---



## ३. गोदोहः

इह गोपालः गां पयो दोग्धि । इयं पीवरा गौः । अस्य गोपालस्य तनयः प्रत्यहं प्रभाते दोहात् परमिमां गां प्रचारभूमिं नयति सायं च प्रत्यानयति । यद्यपि, गावः पलालं धान्यमन्नं पिण्याकं च भक्षयन्ति तथापि बालतृणे तासां महती प्रीतिः ॥

गोः समीपे तिष्ठति वत्सः । स प्रथमं गोः पयः किञ्चित् पिबति । अनन्तरं गोपो दोहनं करोति । स गोः पार्श्वे भूमावुपविश्य वामहस्तेन पात्रं गृहीत्वा दक्षिणहस्तेन दुग्धं दोग्धि । धेनोः क्षीरं, मधुरं पथ्यं पुष्टिकरं च ॥

तत्रैका नारी बालकेन सह तिष्ठति। सा क्षीराय समागता। तं बालं सा पयसा पोषयति। तेन स बुद्धिमान् अरोगश्च वर्तते॥

क्षीरं तक्रेण मिश्रितं दधि भवति। दधि मथित्वा नवनीतं गृह्यते। तप्तं नवनीतं घृतं सम्पद्यते। क्षीरं दधि तक्रं नवनीतं घृतं च मनुष्याणामत्यन्तमुपयुक्तानि वस्तूनि। तानि भोजनाय उपयुज्यन्ते। तानि विना भोजनं न रसकरं भवति। अत एवाहुः—'विना गोरसं को रसो भोजनानाम्'।—इति॥

गां मातरमिव पूजयन्ति भारतीया जनाः। उक्तं च श्रीमन्महाभारते—

'मातरः सर्वभूतानां गावः सर्वसुखप्रदाः'—इति॥

---

१. प्रश्नाः—१. गोपालः किं करोति? २ गावः किं किं भक्षयन्ति? ३. कस्मिन् तासां महती प्रीतिः? ४. गोपालः कथं दुग्धं दोग्धि? ५. गोः क्षीरं कीदृशम्? ६. केन स बालः बुद्धिमान् अरोगश्च वर्तते? ७. दधि नवनीतं घृतं च कथं सम्पद्यन्ते? ८. मनुष्याणाम् अत्यन्तमुपयुक्तानि वस्तूनि कानि? ९. गां कामिव पूजयन्ति भारतीया जनाः? तत्र कारणं किम्?

२) आकारात् परं विसर्ग लोप सन्धिः—

अजाः+अटन्ति=अजा अटन्ति । नराः+इमे=नरा इमे ।

जनाः+यान्ति=जना यान्ति । वृक्षाः+एते = वृक्षा एते ।

३) धातुभिः सह 'य' प्रत्यय योगेन कर्मणि रूपं निष्पद्यते-

Ex: दुह+य+ते = दुह्यते

दुह्, नी, कृ-एतेषां कर्मणि लटो रूपैः वाक्यानि रचयत ॥

४) Note the following:—

परम्+इमम्=परमिमम् । धान्यम्+अन्नं=धान्यमन्नम् ।

Combine the following:—

दुग्धम्+एव । रसकरम्+आहुः ।

५) पर्यायाः—

गौः ६—सौरभेयी धेनुरुस्रा गौरघ्न्या शृङ्गिणी च सा ।

गोपः ६—गोपे गोपालगोसङ्ख्य गोधुगाभीरवल्लवाः ।

घृतम् ४— Ghee) घृतमाज्यं हविः सर्पिः ॥

---

दोह *m.* milking

गोपालक *m.* a milkman

दोग्धि *P* milks

पलाल *n* hay

बालतृण *n* tender grass

पार्श्व *n* side

दुग्ध *n* milk

पथ्य *a n* agreeing with (diet)

पुष्टिकर *a. n.* nourishing

तक्र *n* buttermilk

दधि *n* curd

मथित्वा *in* having churned

नवनीत *n* fresh butter

भारतीय *m* Indian

सर्वभूत *in* all living beings

वत्स *m* calf



४. स्वयङ्कृतोऽनर्थः

जातु काष्ठविक्रेता कश्चित् काष्ठार्थं वनमगच्छत्। तत्र स क्वचिदासीनः परितो विलोक्य विलपितुमारभत। तं विलपन्तं वीक्ष्य तस्मिन् वने स्थितास्तरवः करुणया

तमपृच्छन्—'किं निमित्तं विलपसि?'—इति। सोऽवदत्—'मम कुठारस्य नालं नास्ति। तेनाहं कर्म कर्तुमशक्तोस्मि। अतो भोज्यालाभात् विलपामि'—इति॥

ततः सर्वे तरवः समेत्य तस्मै कृपयैकं चिञ्चालगुडं ददुः। काष्ठच्छित् तं कुठारे संयोज्य तस्मिन् वने स्थितान् कतिचित् वृक्षान् अच्छिनत्॥

तदा अन्ये वृक्षा रोदितुमारभन्त। तदवलोक्य सहकारवृक्षस्थान् प्राह—'भो! बालिशाः! किमिति विलपथ? नायं तस्य दोषः। स्वयंकृत एवायमनर्थोऽस्माभिः नालस्य दानेन'—इति।

---

१) प्रश्नाः—

१. काष्ठविक्रेता किमर्थं कुत्र अगच्छत्? २. तत्र किं कर्तुमारभत? ३. के तं करुणया किमपृच्छन्? ४. काष्ठच्छित् किं प्रत्यवदत्? ५. तस्मै ते किं ददुः? ६. काष्ठच्छित् किमकरोत्? ७. तदा अन्ये वृक्षाः किमकुर्वन्? ८. सहकारवृक्षस्तान् किं प्राह? ९. अनर्थः कथं स्वयंकृतः अभवत्?

२) विसर्ग सन्धिः—('अः' इत्यस्य ओकारः भवति)

इतः + गच्छति = इतो गच्छति।

स्वतः + जायते = स्वतो जायते।

बुधः + रमते = बुधो रमते ।

शिष्यः + नमति = शिष्यो नमति ॥

३) जातु, अतः, ततः, स्वयम्—एतान्युपयुज्य वाक्यानि रचयत ॥

४) णिजन्तरूपैः वाक्यानि पूरयत—

१) उपाध्यायः शिष्यान् (पठ्) ३) गुरुः सन्मार्गं (दृश्)

२) सूर्यः स्वभासा जगत् (प्रकाश्) ४) वायुः पादपान् (चल्)

५) पर्यायाः—

वृक्षाः १३—वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।

अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः ।

सहकारः ५—आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः ॥

---

जातु *in.* once
काष्ठविक्रेतृ *m.* a wood seller
काष्ठार्थम् *in.* for wood
आसीन *a, m.* sitting
परितः *in,* all round
विलपितुम् *in* to weep
कुठार *m.* an axe
नाल *n.* handle
भोज्य *n.* food
चिञ्चालगुड *m.* a stick of the tamarind tree
काष्ठच्छिद् *m.* wood cutter
अच्छिनत् *P.* cut
सहकारवृक्षः *m.* a mango tree
पादप *m.* tree
बालिश *m.* foolish

---

श्री सीता-लक्ष्मण-भरत-शत्रुघ्न-हनूमत्समेत-

श्रीरामचन्द्रस्वामिने नमः ।

श्रीरामजयम्



श्रीरामजयम्

५. श्रीरामपट्टाभिषेकः

अथायोध्यानिवासास्ते जनास्सर्वेऽपि तोषिताः
अभिगम्याब्रुवन् रामं धन्या वयमिति द्रुतम् ॥ १

चातकास्तु घनान् दृष्ट्वा मयूराश्च यथा शिशून् ।
आसाद्य मातरस्तोषं तथा प्रापुर्जना भुवि ॥ २

अथाभिषेकं रामस्य वसिष्ठाद्याः मुदाऽन्विताः ।
सहिता मन्त्रिभिश्चक्रुः वसवो वासवं यथा ॥ ३

अभिषेकोत्सवे सर्वे सुग्रीवाद्याः कपीश्वराः ।
यथार्हं पूजिताश्चासन् स्रग्गन्धाम्बरभूषणैः ॥ ४

विशिष्य मुक्ताहारेण सीतया हनुमान् मुदम् ।
पूजितश्च तथा लेभे यथा सीतावलोकने ॥ ५

पितुः सिंहासनं प्राप्य भ्रातृभिः सहितोऽनघः ।
विरराज तथा रामो यथा विष्णुस्त्रिविष्टपे ॥ ६

लक्ष्मणानुमते रामो यौवराज्यं तु दत्तवान् ।
भरतायाप्रमेयाय प्राणात् प्रियतराय सः ॥ ७

चत्वारस्ते महात्मानः सभार्या रघुसत्तमाः ।
खे सतारो यथा चन्द्रः तथा रेजुः स्वपत्तने ॥ ८

यस्तु दाशरथिर्भूत्वा रणे हत्वा च रावणम् ।
ररक्ष लोकान् वैकुण्ठः स मां रक्षतु चिन्मयः ॥ ९

(श्रीरामोदन्तात् उद्धृतम्)

मङ्गळश्लोकः

मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।
चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥

## CHARACTERS IN LESSON 5

1. श्रीराम - The Lord of अयोध्या and the Hero of the mighty Epic Ramayana.
2. सीता - The Ideal wife of श्रीराम and the Heroine of Ramayana.
3. लक्ष्मण, भरत & शत्रुघ्न } The three Ideal younger brothers of श्रीराम
4. हनूमान् - The Ideal श्रीरामभक्त and the Minister of सुग्रीव.
5. सुग्रीव - The Monkey King of किष्किन्धा and the friend of श्रीराम
6. वसिष्ठ - The Celebrated Sage and the family Priest of श्रीराम
7. रावण - The राक्षस King of लंका and the foe of श्रीराम

---

१) प्रश्नाः—

१. श्रीरामं के किम् अब्रुवन्? २. जनाः तोषं प्रापुः—अत्र दृष्टान्ताः के? ३. रामस्य अभिषेकमहोत्सवे के कथं पूजिताः? ४. हनूमान् कथं मुदं प्राप? ५. रामः कथं विरराज? ६. यौवराज्यं रामः कस्मै दत्तवान्? ७. चत्वारः महात्मानः के? कथं रेजुः? ||

२) विसर्गरेफ सन्धिः—(Visarga is changed to ' र् ')

हरिः + अर्च्यते = हरिरर्च्यते । गुरुः + एति = गुरुरेति ।

धेनुः + गच्छति=धेनुर्गच्छति । गौः + दुह्यते = गौर्दुह्यते ॥

३) श्रीरामपट्टाभिषेकचरितं गद्यरूपेण लिखत ॥

४) कर्तरि प्रयोगः (Active Voice)

In Sanskrit, in Active Voice, the subject will be in प्रथमा विभक्ति and the object in द्वितीया विभक्ति । The number and person of the verb will follow the Subject.

Ex: गोपालः गां रक्षति ।

५) पर्यायाः—

अयोध्या ४—साकेतः स्यादयोध्यायां कोसला नन्दिनी च सा ।

---

अभिषेक *m* coronation

चातक *m* a kind of bird which is supposed to live only on rain drops

घन *m* cloud

मुद् *f* Joy

स्रज् *f* garland

यथार्हम् *in* according to their status

गन्ध *m* scent

अम्बर *n* cloth

भूषण *a* Ornament

अनघ *m* faultless

विरराज *U.* shone

अप्रमेय *a* very great

सतार *a* with stars

पत्तन *n* town

ख *n* sky

रण *m* battle.



६. अश्वः

इह कश्चिदश्वस्तिष्ठति। गोरश्वस्य च को भेदः? अश्वो गवापेक्षया प्रांशुः। अश्वस्य पादाः दीर्घतराः। तस्य ग्रीवायां रोमराजिर्वर्तते। अश्वस्य शृङ्गे न स्तः। गोः शफो द्वेधा दलितः, अश्वस्य तु न। अतोऽश्वः शीघ्रतरं धावति॥

अयमश्वो रथे बध्यते। कैश्चित् द्वावश्वौ रथे बध्येते। राजानो धनिकाश्चोत्सवदिवसेषु चतुरः ततोऽधिकान् वा तुरगान् रथे योजयन्ति। समवर्णैः बहुभिरश्वैः युक्तो रथः सुरम्यो भवति॥

अश्वाः सुशिक्षिताः सञ्चारायोपयुज्यन्ते । वनमार्गेषु जनाः प्रायेणाश्वैरेव सञ्चारं कुर्वन्ति । अश्वस्य पृष्ठे पर्याणमास्तीर्य तस्मिन्नुपविशत्यश्वारोहः । मुखबद्धं खलीनमाकर्षन् सोऽश्वं नयति ॥

अश्वाः सङ्ग्रामेषु राज्ञां साह्यमाचरन्ति । ते रणाङ्गणे महत् कौशलं प्रदर्शयन्ति । कदाचित् ते योधानां प्राणानपि रक्षन्ति । अतः प्राधान्येन राजानोऽश्वसैन्यं सर्वदैव संरक्षन्ति ॥

---

१) प्रश्नाः—

१. गौः अश्वस्य च भेदं निरूपयत । २. कुतोऽश्वः शीघ्रतरं धावति ? ३. कति अश्वा रथे बध्यन्ते ? ४. अश्वैः कः उपयोगः ? ५. कुतो राजानः सर्वदैव अश्वसैन्यं संरक्षन्ति ?

२) विसर्ग सन्धिः — (विसर्गस्य 'सकारः' भवति)

अश्वः + तिष्ठति = अश्वस्तिष्ठति ।

पयः + समुद्रः = पयस्समुद्रः ॥

३) सदृश-शब्दाः — (Similar words)

१) तुरगः =तुरङ्गः =तुरङ्गमः । (Horse)

२) विहगः =विहङ्गः =विहङ्गमः । (Bird)

३) पतगः =पतङ्गः =पतङ्गमः । (Bird)

४) भुजगः =भुजङ्गः =भुजङ्गमः । (Snake)

४) साह्यम्, साहाय्यम्, साहायकम्--एते समानार्थाः ॥

५) क) एकपदीकुरुत—(Give one word for)

e g नालस्य दानेन = नालदानेन ।

१. अश्वस्य पादाः । २. महत् कौशलम् । ३. राज्ञः पुरुषः ।

ख) द्विपदीकुरुत—(Split into two words)

e.g. रणाङ्गणे = रणस्य अङ्गणे ।

१. अश्वसैन्यम् । २. मुखबद्धम् । ३. वनमार्गाः ॥

६) पर्यायाः—

अश्वः १३— घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः ।

(Horse) वाजिवाहार्वगन्धर्व हयसैन्धवसप्तयः ॥

---

ग्रीवा *f* neck
रोमराजि *f* a line of hair
शृङ्ग *n a* horn
शफ *m* a hoof
दलित *a. m.* split
समवर्णः *a. m.* of uniform colour
पर्याण *n* a sadle
अश्वारोह *m* a horse-man
खलीन *n* bit of a bridle
सङ्ग्राम *m. a.* battle
योधा *m* warrior
अश्वसैन्य *n* cavalry
साह्यम् *n* help.



७. शृगालस्य कौशलम्

चित्रेऽस्मिन् एकः शृगालोऽजस्य पृष्ठे पदं निधाय तिष्ठति। कथय, किं निमित्तं स तथा तिष्ठति?

अयं शृगालः पानीयं पातुं वापीं गतो जले ममज्ज। तेन बहिर्गन्तुं बहवो यत्नाः कृताः। किन्तु ते सर्वे मुधाऽभवन्॥

अत्रान्तरे कोऽप्यजः पिपासाकुलः परिभ्रमन् तत्रागतः। अपृच्छच्च शृगालम्—'सखे अपि मधुरं जलम्'—इति। शृगालः परेषां वञ्चने नितरां पटुः। अतः स आह—'मधुरमिति किमुच्यते! केवलं पीयूषमेव! प्रभूतं पिबतोऽपि न मे वाञ्छा निवर्तते॥ न शक्नोम्येतां वापीं हातुम्'—इति॥

अजस्तावदृजुबुद्धिः। अतः स वञ्चकस्य वचन सत्यं मत्वा शनैरन्तः प्रविशति। ऊर्ध्वमुखमवरोहतस्तस्य पृष्ठे पदं निधाय वापीतः समारोहति शृगालः। अजस्तु वाप्यामेव मज्जनोन्मज्जने कुर्वन् विपेदे। पश्यत! शृगालस्य कौशलम्॥

---

१) प्रश्नाः—

१. किमर्थं शृगालः अजस्य पृष्ठे पदं निधाय तिष्ठति? २. अयं शृगालः कथं वाप्यां पतितः? ३. अजः शृगालं किमपृच्छत्? ४. कथं शृगालो वापीतः समारोहत्? ५. अजः कथं विपेदे?

२) विसर्ग सन्धिः—(विसर्गस्य 'श' कारः, 'ष' कारः, 'स'-कारो वा भवति)

पूर्णः + चन्द्रः = पूर्णश्चन्द्रः। धनुषः + टङ्कारः = धनुषष्टङ्कारः
अलसः + शेते = अलसश्शेते। अजः + तु = अजस्तु।

३) मुधा, अपि, नितराम्, एतान्युपयुज्य वाक्यानि रचयत॥

४) उपदेशः—१. वञ्चकस्य वचनं न विश्वसनीयम्

२. तस्योपकारोऽपि न कर्तव्यः ॥

५) पर्यायाः —

पिपासा ६— उदन्या तु पिपासा तृट् तृषा तर्षश्च तर्षणम् ।

पीयूषम् (Nectar) ३—सुधा पीयूषममृतम् ।

विषं (Poison) ३—क्ष्वेडस्तु गरलं विषम् ।

शृगालः १०— *स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः ।

(Jakcal) शृगाल-वञ्चक-क्रोष्टु-फेरु-फेरव-जम्बुकाः ।

*स्त्रियां शिवा जम्बुकपर्यायः 'शिवा' शब्दः नित्यं स्त्रीलिङ्गः इत्यर्थः ॥

---

**पानीय** *n* water
**वापी** *f* a well
**ममज्ज** *P.* Sang
**मुधा** *in* in vain
**अत्रान्तरे** *in.* in the meanwhile
**पिपासाकुल** *a. m.* afflicted by thirst
**पटु** *a m* clever
**वाञ्छा** *f* desire
**हातुम्** *in.* to leave
**ऋजुबुद्धि** *a. m.* straight—forward
**वञ्चक** *m* deceitful; also jackal
**शनैः** *in* slowly
**वापीतः** *in.* from the well
**मज्जनोन्मज्जने** n sinking and coming up
**नितराम्** *in.* very much
**कौशलम्** *n* cleverness.

---



## ८. व्याघ्रचित्रकौ

व्याघ्रो वन्यः पशुः । सः हिंस्राणां मृगाणां मध्येऽतीव क्रूरः । इतरेभ्यः पशुभ्यो व्याघ्रः शीघ्रतरं धावति । व्याघ्रस्य देहे सर्वत्र कृष्णा बिन्दवो रेखाश्च सन्ति । यदि तस्य स्वभावः शान्तोऽभविष्यत् तर्हि जनास्तं मृगान्तरापेक्षया अधिकतरम् आदरिष्यन्त ॥

चित्रकस्तु व्याघ्रादपि सुन्दरः । चित्रकायः इत्यप्ययं व्यपदिश्यते । एकदा चित्रकः कश्चित् स्वस्य रूपेण गर्वितो भूत्वा मृगसभायामेवमब्रवीत्—'सिंहो न मम तुलां भजते । अतोऽहमेव मृगराज्येऽभिषेक्तव्यः'—इति ॥

तेषां मध्यतः क्रोष्टोवाच—'आर्य ! त्वमेकं गजं निहत्य मृगपरिवारं तर्पय ; येन त्वां मृगराज्येऽभिषेक्ष्यामः'—इति । तद्वचनं श्रुत्वा लज्जितश्चित्रकः—



'इदानीमेव आगमिष्यामि'—इत्युक्त्वा ततः प्रस्थितः तद्वनमेव परित्यज्य गतः ॥

१) प्रश्नाः—

---

१. व्याघ्रः कीदृशः पशुः? तम् अधिकृत्य द्वित्राणि वाक्यानि वदत । २. चित्रकः कीदृशः? ३. रूपेण गर्वितः चित्रकः मृगसभायां किमब्रवीत्? ४. क्रोष्टा किमुवाच? ५. चित्रकः किमकरोत्?

२) सन्धिः—(विसर्गस्य विकल्पेन जिह्वामूलीयः (ᳵ) भवति)

व्याघ्रः + कथयति = व्याघ्रᳵकथयति, व्याघ्रः कथयति ।

सुरूपः + खगः = सुरूपᳵखगः, सुरूपः खगः ।

वन्यः + पशुः = वन्य॒पशुः, वन्यः पशुः ।

वृक्षः + फलति = वृक्ष॒फलति, वृक्षः फलति ॥

३) विपरीतपदानि —(Opposite words)

वन्यः X ग्राम्यः । ह्रस्वम् X दीर्घम् । उपरिष्टात् X अधस्तात् ।

क्रूरः X शान्तः । उदयः X अस्तमयः । पुरस्तात् X परस्तात् ।

अल्पं X बहु । उपरि X अधः । सुलभं X दुर्लभम् ॥

४) पर्यायाः—

व्याघ्रः (Tiger) —शार्दूलद्वीपिनौ व्याघ्रे ।

देहः ११ —गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ।

कायो देहः *क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः ॥

क्लीबपुंसोः देहशब्दः नपुंसकलिङ्गः पुंलिङ्गश्च इत्यर्थः ।

मूर्त्यादयः त्रयः शब्दाः स्त्रीलिङ्गाः ॥

---

वन्य *a. m.* wild

पशु *m.* a beast

हिंस्र *a. m.* cruel

बिन्दव *m.* dots, spots

चित्रक *m.* a cheeta

तुला *f.* Equality

मृगराज्य *n.* kingdom of animals

क्रोष्टा *m.* a jackal

मृगपरिवार *m.* animal follower

खग *m.* a bird

---



## ९. अश्वसारङ्गयोः कथा

कश्चिदश्वः सारङ्गश्चैकस्मिन् केदारे नित्यं चरतः, महता च स्नेहेन कालं नयतः। एवं स्थिते तौ जातु कलहपरौ जातौ। तयोः सारङ्गः शृङ्गबलेनाश्वं केदारान्निरवासयत्॥

ततः सारङ्गस्य प्रतीकारं कर्तुमिच्छन्नश्वः कश्चिन्मनुजं प्राप्य तस्य साहाय्यं ययाचे। स मनुजः परं प्रहृष्टः तस्य पृष्ठे पर्याणमारोप्य मुखे खलीनं दत्त्वा तमारोहत्। तस्य गतिं परीक्षमाणः कशया तं तीव्रमताडयत्। स्वकार्यार्थी तत् सर्वमसहताश्वः। तस्य मनुजस्य साहाय्येन सोऽश्वः सारङ्गमजयत्॥

कृतकृत्यः स तुरगो मनुजं निजगाद—'सिद्धं मे समीहितमधुना। पर्याणं खलीनं चापनीय मां गमनायानुमन्यस्व'—इति। तन्निशम्य मनुजस्तं बभाषे—'मया तवैतावत् प्रयोजनमिति जानाम्यहम्। किन्त्वितः परं त्वया मे प्रयोजनं भविष्यति। कथमहं त्वां विसृजेयम्?'—इति॥

ततो यावज्जीवं सोऽश्वः तस्य मनुजस्य वाजिशालायां बन्धने स्थितः परतन्त्रतया परां पीडामन्वभूत्। परतन्त्रस्य कुतः सुखम्?

उक्तं च सुभाषितरत्नाकरे—

'सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्'—इति॥

---

१) प्रश्नाः

१. कौ एकस्मिन् केदारे नित्यं चरतः, तौ कथं कालं नयतः? २. एवं स्थिते तौ कीदृशौ जातौ? ३. कः केन अश्वं केदारान्निरवासयत्? ४. कथमश्वः सारङ्गमजयत्? ५. कृतकृत्यः स तुरगो मनुजं किं जगाद? ६. मनुजस्तं किं बभाषे? ७. अश्वः कीदृशं फलमन्वभवत्? ८. अस्मिन् पाठे उपदेशः कः?

२) सन्धिः—(सः, एषः, इत्यनयोः विसर्गस्य लोपः भवति)

सः+याति = स याति। सः+कथयति = स कथयति।
एषः+धावति = एष धावति। एषः+पचति = एष पचति॥

३) कर्मणि प्रयोगः (Passive voice)

In Passive Voice, the subject will be in तृतीया विभक्ति and the object in प्रथमा विभक्ति। The number and person of the verb will follow of the object.

Ex:—गोपालेन गौः रक्ष्यते।

४) उपदेशः—(Moral)

एकस्य जयार्थमन्यमाश्रयन् जनः स्वयमनर्थे पतति ॥

५) पर्यायाः—

स्वतन्त्रः ५—स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः।
(Independent)

परतन्त्रः—४—परतन्त्रः पराधीनः परवान् नाथवानपि ॥
(Dependent)

---

सारङ्ग *m.* deer
केदार *m.* a field
कलहपर *a. m.* quaraller
निरवासयत् *P.* banished
प्रतीकार *m.* retaliation
ययाचे *U.* begged
कृतकृत्य *a. m.* he who has accomplished his object
समीहित *n.* wish, desire
एतावत् *n.* this much
वाजिशाला *f.* a stable
बन्धन *n* bondage

---



## १०. कोकिलः

नायं सुरूपो विहगो नापि कायोऽस्य भासुरः ।
न चास्य पक्षयोः सन्ति चित्रवर्णा विशेषकाः ॥ १
केवलं काकसदृशो रूपे वर्णेऽप्ययं खगः ।
अथापि मधुरं गायन् अयं जगति पूज्यते ॥ २
रसालशिखरासीनो वसन्ते मधुरं स्वनन् ।
कस्य नो हृदयानन्दं जनयत्येष कोकिलः ॥ ३
काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
वसन्तकाले संप्राप्ते काकः काकः पिकः पिकः ॥ ४

किं कुलेन विशालेन किं रूपेण सुशोभिना ।
ऋद्धत्वे कारणं तावत् वाग्रसो जनरञ्जकः ॥ ५ ॥

---

१) प्रश्नाः—

१. कोकिलः कीदृशो विहगः ? २. काकः कोकिलश्च कथं सदृशौ ? ३. कोकिलः कथं हृदयानन्दं जनयति ? ४. कदा काकः काकः पिकः पिकश्च भवतः ? ५. कः उपदेशो युष्माभिः पाठादस्मात् गृह्यते ? ६. महत्त्वस्य कारणं किम् ? किं न ?

२) गुणसन्धिः—According to पाणिनि सूत्र 'गुण' denotes the 2 letters ए and ओ. द्वयोः वर्णयोः 'ए' कारः, 'ओ' कारः वा भवति—

अत्र + इदम् = अत्रेदम् ।
यथा + इच्छसि = यथेच्छसि ।
जलस्य + उद्धरणम् = जलस्योद्धरणम् ।
रमा + उवाच = रमोवाच ॥

३) कर्तरि प्रयोगं दर्शयत —

१) अयं जगति पूज्यते ।
२) दधि मथित्वा नवनीतं गृह्यते ।
३) मया आत्मा किमित्यायास्यते ।
४) अयमश्वो रथे बध्यते ॥

४) नो, न इमौ निषेधार्थकौ । इमौ प्रयुज्य वाक्यानि रचयत ॥

---

५) व्याकरणे प्रश्नाः—

द्वयोः पदयोः स्थाने एकं पदं भवति । यथा—

रामं लक्ष्मणम् = रामलक्ष्मणौ ।

क) एकपदीकुरुत—

१) रूपे वर्णे । २) पिकं काकम् । ३) कुलेन शीलेन

ख) अस्मिन् पाठे कति सन्धयः सन्ति ?

सन्धीकृतानि पदानि वदत ?

ग) वर्णेऽपि, कायोऽस्य—अत्र कः सन्धिः ?

६) पर्यायाः—

कोकिलः ४—वनप्रियः परभृतः कोकिलः पिकः इत्यपि

शुक्लः १३—शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः ।

(White) अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः ॥

कृष्णः ७—कृष्णे नीलासित*श्यामकालश्यामलमेचकाः ।

(Black) *असितः, न सितः = कृष्णः इत्यर्थः ॥

---

कोकिल *m*, पिक *m* } cuckoo

भासुर *a. m.* shining

विशेषक *m* line, dot

रसाल *m* mango tree

शिखर *n* top

विशाल *a. n.* great, noble

महत्त्व *n* greatness

वाग्रस *m* sweetness of speech

जनरञ्जक *a. m.* that which attracts people.



## ११. कूपः

अयं रमणीयः कूपः। पानाय योग्यं जलं कूपे लभ्यते। सरसो जलं स्नानेन मलिनं भवति। नद्याः सलिलं प्रकृत्यैव कलुषम्। समुद्रस्य वारि लवणम्। कूपस्य उदकम् अनाविलं पानयोग्यं च भवति॥

चित्रं पश्य। कूपस्य समन्तात् बहूनि सन्ति क्षेत्राणि। ततो नातिदूरे दृश्यन्ते कतिचन गृहाणि। तेषु गृहेषु वसन्त्यः स्त्रियः अस्मात् कूपाज्जलं नयन्ति॥

अस्य कूपस्य समीपे चतस्रः स्त्रियः सन्ति। द्वे स्त्रियौ जलघटं शिरसि निधाय गच्छतः। अपरा कूपाज्जलमुद्धरति। अन्या जलमुद्धर्तुं घटहस्ता तिष्ठति॥

अयमगाधः कूपः। अतोऽस्मात् कूपाज्जलस्योद्धरणाय दारुचक्रमुपयुज्यते। पश्य, कूपस्य पार्श्वयोः द्वौ स्तम्भौ निखातौ। तयोरुपरि तिर्यक् दारुदण्डो योजितः। तस्य मध्ये दारुचक्रं पिनद्धम्। तस्य चक्रस्यान्तराले रज्जुः प्रवेशिता। तस्या रज्जोरग्रेण घटं कण्ठे बद्ध्वा तं कूपेऽवतारयन्ति, जलं चोद्धरन्ति। दारुचक्रस्य स्थानेऽयश्चक्रमपि कैश्चिदुपयुज्यते। अद्यत्वे भूयसा वैद्युतशक्तिमुपयुज्य यन्त्रेण जनाः कूप्याद्यर्थं कूपात् जलमुद्धरन्ति॥

---

१) प्रश्नाः—

१. पानाय योग्यं जलं कुत्र लभ्यते? २. सरसः समुद्रस्य नद्याः कूपस्य च जलं कीदृशम् ३. अस्य कूपस्य समीपे स्थिताः स्त्रियः किं कुर्वन्ति? ४. अय कीदृशः कूपः? ५. अस्मात् कूपात् कथं जलमुद्धरन्ति? ६. जलस्य उद्धरणाय किं किम् उपयुज्यते?

२) वृद्धिसन्धिः—According to पाणिनि सूत्र 'वृद्धि' denotes the 2 letters 'ऐ' and 'औ', Here द्वयोः वर्णयोः 'ऐ' कारः, 'औ' कारः वा भवति।

मम+ एव = ममैव।

न + ऐच्छत् = नैच्छत्। वन + ओषधिः = वनौषधिः।

दिव्य + ओषधम् = दिव्यौषधम्॥

३) विशेषणं (Adjective) It will follow the Noun in Gender, Number and case.

१) मध्याह्ने सूर्यस्य प्रकाशः कठोरः ।

२) गोः क्षीरं पथ्यं पुष्टिकरं च ।

३) इति ब्रुवन् स गोमायुर्निराशो निर्गतः ।

४) शृगालः परेषां वञ्चने नितरां पटुः ॥

४) पर्यायाः—

जलम् २५—'आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्
(Water) पयः कीलालममृतं जीवनं भुवनं वनम् ॥
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोऽर्णस्तोयपानीय नीरक्षीराम्बुशम्बरम् ॥
मेघपुष्पं घनरसः त्रिषु द्वे' आप्यमम्मयम् ॥

'आपः स्त्री भूम्नि=अप् शब्दः नित्यं स्त्रीलिङ्गः बहुवचनान्तश्च ॥
'आप्यम्, अम्मयम् इति द्वौ शब्दौ जलविकारस्य पर्यायौ ।

---

प्रकृतिः *f.* nature
कलुषः *a. n.* dirty
लवण *a. n.* saline; saltish.
अनाविल *a. n.* free from dirt; pure
अगाध *a. m.* deep
दारुचक्र *n. u.* wooden wheel
निखात *a. m.* fixed, planted
तिर्यक् *in* obliquely
पिनद्ध *a. n.* fastened
रज्जु *f.* a rope
अयश्चक्र *n.* iron wheel

## १२. वानरक्रीडा

अस्मिन् वृक्षे केचिद्वानराः क्रीडन्ति। ते वृक्षाद्वृक्षं विटपाद्विटपं च प्लवन्ते। वानराः प्रायेण नरैस्तुल्यरूपाः। अथापि नरा इव गृहाणि खगा इव नीडानि वा कर्तुं न ते शक्नुवन्ति। सर्वदैव ते वृक्षेषु निवसन्ति। कन्दैः फलैश्चोदरं पूरयन्ति। वानराः स्वभावात् एव चपलाः कोपनाश्च।

काचित् कथा श्रूयते यथा—एकदा वर्षासु कश्चिद्वानरः शैत्येन बाधितो दन्तवीणां वादयन् कस्यचन शमीतरोर्मूलमाससाद। तस्मिन् वृक्षे कुलायं कृत्वा चटकदम्पती निवसतः स्म। तयोः चटका शैत्येन कम्पमानं वानरमवलोक्य करुणया प्राह—

"नीडं कुर्मो वयं चापि चञ्चुमात्राहृतैस्तृणैः।
पाणिपादादिसंयुक्ता यूयं किमिति सीदथ?" इति।

तदाकर्ण्य वानरस्तामाह—'दुष्टे! अलं जल्पनेन; तूष्णीमास्स्व'—इति। सा तु करुणाविष्टा पुनः पुनस्तदेव वचनमभ्यधात्॥

तेन कुपितो मर्कटः—'सूचीमुखि! दुराचारे! किं प्रलपसि' इति वदन् शमीवृक्षमारुह्य तस्याः कुलायं



शतधा भङ्क्त्वा क्षितावपातयत् ॥

१) प्रश्नाः—

१- अस्मिन् वृक्षे वानराः किं कुर्वन्ति ? २. ते कुत्र निवसन्ति ? ३. कैश्चोदरं पूरयन्ति ? ४. मर्कटाः कीदृशाः ? ५. वानरः कथं शमीतरोः मूलमाससाद ? ६. तस्मिन् वृक्षे कौ निवसतः स्म ? ७. वानरमवलोक्य का किं प्राह ? ८. वानरस्तां किमाह ? ९. सा किमकार्षीत् ? १०. तेन कुपितो वानरः किमकरोत् ?

२) यण् सन्धिः—('इ' कारस्य 'य' कारः, 'उ' कारस्य 'व' कारः 'ऋ' कारस्य 'रेफः' च भवन्ति)

लघु + आहारः = लघ्वाहारः ।
इति + आह = इत्याह ।
मातृ + आशीः = मात्राशीः ॥

३) क्रियाविशेषणं (Adverb). It is indeclinable and modifies the verb.

१) कोकिलः वसन्ते मधुरं गायति ।
२) अश्वाः शीघ्रतरं धावन्ति ।
३) स मनुजः परं प्रहृष्टः अभवत् ।
४) गुरुः कुपितश्छात्रं तीव्रमताडयत् ।

४) विशेषशब्दाः—

वर्षाः, (Rainy Season) आपः (water). = नित्यं स्त्रीलिङ्ग-बहुवचनान्तौ ; दाराः (a wife) = नित्यं पुंलिङ्ग बहुवचनान्तः ॥

५) व्याकरणे प्रश्नाः—

१) निवसतः स्म— अत्र व्याकरणविशेषः कः ?

२) अस्मिन् पाठे ल्यबन्तानि अव्ययानि कानि कानि ?

३) पदानि पृथक्कृत्य दर्शयत—

१. क्षितावपातयत्। २. फलैश्चोदरम्। ३. वानरस्तामाह॥

६) पर्यायाः—

वानरः १०—कपिप्लवङ्ग प्लवग शाखामृगवलीमुखाः।

(Monkey) मर्कटो वानरः कीशो वनौकाश्च प्लवङ्गमः॥

दम्पती ४—दम्पती जम्पती जायापती भार्यापती च तौ।

---

खग *m.* bird
विटप *m.* a branch, bough
कन्दानि *n.* bulbous roots
चपल *a. m.* fickle
कोपना *a. m.* passionate
वर्षाः *f.* rainy season (Always plural)
शैत्यम् *n.* cold
दन्तवीणा *f.* chattering of the teeth
चटक *m.* a sparrow
जल्पनम् *n.* prattling
तूष्णीं *in* आस् *A.* keep quite
सूचीमुखी *f.* needlefaced
कुलाय *m.* a nest of a bird
शतधा *in* into a hundred-pieces
क्षिति *f.* the earth, ground.

---



१३. मयूरः

इदं किमपि रमणीयमुद्यानम्। अत्र द्वौ मयूरौ एका मयूरी तरवो लताः प्राकारश्च दृश्यन्ते। एको मयूरः पिच्छानि विस्तृत्य नृत्यति। अपरः पिच्छानि संवृत्य प्राकारस्योपरि तिष्ठति। तेन सह मयूरी अपि तत्र तिष्ठति। मयूर्याः पिच्छभारो नास्ति। नापि सा रम्या॥

मयूराणां बर्हेषु चित्रवर्णा अर्धचन्द्राकृतयो विशेषकाः सन्ति। ते जनानां चक्षूंषि रमयन्ति। एतैः मयूराणां बर्हैः व्यजनानि क्रियन्ते। केचित् तानि भूषणत्वेन धरन्ति॥

मयूरा वर्षासु मेघस्य शब्दं श्रुत्वा प्रहृष्टाः नृत्यन्ति। बर्हाणि विस्तृत्य नृत्यन् मयूरः फुल्लकुसुमो बालवृक्ष इव विभाति। तस्य केकारवस्तु काकस्वरवत् परुषः। अथापि तस्य रूपमतीव मनोहरम्। अतो मयूरान् गृहीत्वा धनिनो जनाः पुष्पोद्यानेषु संरक्षन्ति॥

---

१) प्रश्नाः—

१. इदं कीदृशमुद्यानम्? २. तत्र के के वर्तन्ते? ३. मयूरौ किं कुरुतः? ४. प्राकारे कौ तिष्ठतः? ५. मयूराणां पिच्छैः कः उपयोगः? ६. मयूराः कदा नृत्यन्ति? ७. कः फुल्लकुसुमे बालवृक्ष इव विभाति? ८. केकारवः कीदृशः? ९. कुतः जनाः मयूरान् गृह्णन्ति?

२) सवर्णदीर्घ सन्धिः-(अत्र द्वयोः वर्णयोः तत्सदृशः दीर्घः भवति)

उदाहरणम्—जगाम + असौ = जगामासौ।
इति + ईरयति = इतीरयति।
गुरुः + उपदेशः = गुरूपदेशः॥

३) अधः निर्दिष्टेषु सन्धिं दर्शयत

१) अत्र + आसीत्; २) गच्छति+इव; ३) वधू+उद्वाहः।

४) विग्रहवाक्यम्—(उदाहरणम्)

काकस्वरः इव = काकस्वरवत् ॥

अधः प्रदर्शितनां विग्रहवाक्यानि वदत—

खगवत्, तरुवत्, हीरवत्, तद्वत् ॥

५) निर्दिष्टैः विशेषणशब्दैः वाक्यानि पूरयत—

१)—(पानयोग्य) इमा आपः।

२) केकारवः काकस्वरवत्—(कठोर)।

३) बर्हैः—(रमणीय) व्यजनानि क्रियन्ते।

४) —(महत्) जनानां पन्थानमनुसर।

६) पर्यायाः—

मयूरः ९—मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक्।
(Peacock) शिखावलः शिखी केकी मेघनादानुलास्यपि ॥
शिखा २—शिखा चूडा शिखण्डस्तु ॥
पिच्छं ३—पिच्छबर्हे नपुंसके ॥

---

उद्यान *n* a garden, park
प्राकार *m* wail
पिच्छं, बर्हम् } *n* tail of a peacock
विस्तृत्य *in* having expanded
संवृत्य *in* having closed
व्यजन *n* fan
फुल्ल *a* blown, opened.



१४. मृगाणां पक्षिणां च समयः

कृषीबलः कश्चिदरण्यपरिसरभूमौ वसति स्म। जातु तस्य कुक्कुटः केदारे भक्ष्यमन्विष्यन्नास्त। जम्बुकः कश्चन बुभुक्षितः परिभ्रमंस्तमुद्देशमागतः। कुक्कुटस्तमवेक्ष्य समीपस्थस्य तरोः शिखरमारोहत्।

वञ्चको भग्नाशस्तरोर्मूलमासाद्य कुक्कुटं प्रलोभयन्नाह- 'भद्र! किमिति मां दृष्ट्वा वृक्षमारूढवानसि? अद्य खलु, मृगैः पक्षिभिश्च सर्वैः सम्भूय समयः कृतः। तत्रैव निर्णीतम् 'न कोऽपि कस्मा अपीतः परं द्रुह्येत्। न कमपि पीडयेत्।

किन्तु सर्वैः स्नेहेन वर्तितव्यम्। य एनं समयमुल्लङ्घते स तीव्रं दण्डयेत'—इति। तेनाहं त्वां स्नेहेनालिङ्गितुं समागतः। कथं त्वं मत्तो बिभेषि?"—इति। कुक्कुट आह—'सखे! सत्यमुक्तं भवता। परं त्वं बुभुक्षित इव दृश्यसे। अतः कथं वृक्षादवरोहेयम्!—इति॥

एवं वदत्येव तस्मिन् नातिदूरे व्याघ्रः कश्चित् समाययौ। कुक्कुटः शिरोधरामुन्नमय्य तमीक्षाञ्चक्रे। गोमायुस्तमपृच्छत्—'भद्र! किं सादरं वीक्षसे? कुक्कुट आह—'सखे! नातिदूरे व्याघ्र आगच्छति'। क्रोष्टा भीतः—'भद्र! यद्येवं नमस्ते। समयान्तरे त्वां भूयो द्रक्ष्यामि' इत्युक्त्वा प्रस्थितः॥

कुक्कुटस्तं सस्मितमाह—हंहो मा गमः। अहं तरोरवरोहामि। त्वं मां स्नेहेनालिङ्गिष्यसि। 'सर्वैः स्नेहेन वर्तितव्यम्' इति समये स्थिते किमिति त्वं व्याघ्राद्भीतः!'—इति। शृगालः 'न खलु घातुकाः समयमनुवर्तिष्यन्ते! इति, वदन् द्रुतं पलायितः॥

---

१) प्रश्नाः—

१. कुक्कुटः किन्निमित्तं तरोः शिखरमारोहत्? २. मृगैः पक्षिभिश्च सम्भूय कः समयः कृतः? ३. व्याघ्रः कदा कुत्र समाययौ? ४. कुक्कुटः सस्मितं किम् आह? ५. किं वदन् जम्बुकः द्रुतं पलायित? ६. जम्बुकस्य पर्यायान् वदत॥

२) अयवायाव सन्धिः—('ए, ओ, ऐ, औ' एषां क्रमात् 'अय, अव्, आय्, आव्, आदेशाः विकल्पेन भवन्ति')

एते + आगताः=एतयागताः, एत आगताः ।

शम्भो + एहि = शम्भवेहि, शम्भ एहि ।

तस्मै + आह = तस्मायाह, तस्मा आह ।

मघौ + इह = मघाविह, मघा इह ॥

३) अग्रतः, पृष्ठतः, परितः, उभयतः—एतैः यथायोगं वाक्यानि

पूरयत—१) व्याघ्रः—आगत्य गोपालं व्यापादयत् ।

२) वृषभः शकटस्य—युगे बध्यते ।

३) क्रीडाकाले बालैः रज्जुः—आकृष्यते ।

४) अस्माकं पाठशालायां—प्राकारो वर्तते ॥

४) पर्यायाः—

कुक्कुटः ४—कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ।

बुभुक्षितः ४—बुभुक्षितः स्यात् क्षुधितो जिघत्सुरशनायितः ॥

५) नानार्थाः—'समय' पदस्य ५ अर्थाः । यथा—

समयाः शपथाचारकालसिद्धान्तसंविदः ॥

---

समय *m* an agreement

परिसर *m* vicinity, neighbourhood

उद्देश *m* a spot, place

भग्नाश *a. m.* disappointed

प्रलोभयत् *a. m.* seducing

द्विष्यात् *P.* should bear hatred

शिरोधरा *f* neck

समयान्तर *n* another time

द्रुतम् *in.* swiftly.

## १५. प्रश्नोत्तरमाला

(Slokas containing Questions & Answers).

कुत्र विधेयो यत्नः ?
विद्याभ्यासे परोपकारे च ।
अवधीरणा क्व कार्या ?
परनिन्दायां परधने च ॥ १
कुत्र विधेयो वासः ?
सज्जनसविधे सदा सौम्ये ।
कः परिहार्यो देशः ?
पिशुनजनैः सङ्कुलीभूतः ॥ २
कोऽन्धः ? योऽकार्यरतः ;
को बधिरः ? यः शृणोति नान्योक्तिम् ॥
को मूकः ? यः काले
प्रियाणि वक्तुं न जानाति ॥ ३
को धर्मः ? भूतदया ;
किं सौख्यम् ? नित्यमरोगिता जगति ।
कः स्नेहः ? सद्भावः
किं पाण्डित्यं ? परिच्छेदः ॥ ४

---

उपसर्गाः or Prepositions are indeclinable words prefixed to Verbs. These *modify*, *intensify* and totally *alter* the original sense of the *Roots*. This is explained by the following Sloka.

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहार संहार विहार परिहारवत् ॥

e. g. the *Root* हृ=' to take away ' when added to the उपसर्ग has the following different meanings.

| | उपसर्ग | धातु | Meaning |
|---|---|---|---|
| 1. | प्र | + हरति=प्रहरति | beats |
| 2. | आ | + हरति=आहरति | brings |
| 3. | सं | + हरति=संहरति | kills |
| 4. | वि | + हरति=विहरति | plays |
| 5. | परि | + हरति=परिहरति | avoids |

*Note*: Sometimes उपसर्ग is prefixed without any change in meaning.

*e. g.* विशति=enters. प्र+विशति=प्रविशति (enters).

२) पर्याया:—अन्य: ४—इतरोऽन्य: परो भिन्न ।

एकाकी (Alone) ३ - एकाकी त्वेक एकक: ।

सततं १०--अजस्रं सततं नित्यं सर्वदाऽविरतं सदा ।
(Always) अनारतमविश्रान्तम् अनिशं च दिवानिशम् ॥

---

अवधीरणा *f.* disrespect
सौम्य *a. m.* pleasing
सङ्कुलीभूत *a. m* crowded with
बधिर *m.* deaf
मूक *m.* dumb
सद्भाव *m.* good disposition
परिच्छेद *m.* discrimination.



## १६. शुकः

अत्रैकः शुकः पञ्जरे बद्धस्तिष्ठति। पञ्जरात् बहिः शाखायां स्थिता शुकी तस्य माता। सा स्वशावकं बद्धमवलोक्याश्रु मुञ्चन्ती तेन सह भाषते। सा तं किं वदतीति किं जानासि? सा तं वदति—

'वत्स! उक्तं खलु मया न त्वया कोटरान्निर्गन्तव्यम्, कोऽपि त्वां गृह्णीयात्—इति। मम वाक्यमनादृत्य क्रीडितुं कुसुमलतां गतस्त्वम्। यथा मया कथितं तथैव संवृत्तम्' —इति।

शुकस्तामाह—'अम्ब! मातुर्वाक्यम् अनुल्लङ्घनीयमिति जानाम्येव। अथापि क्रीडासक्तेन मया चापल्यात् तन्नालो-

दितम्'। सा प्राह—'जात! एवं गते त्वयि कथं त्वदेक-पुत्रया मया आयुश्शेषो नेयः?' सोऽपृच्छत्—'किमेवं वदसि? किं मम मुक्तिरेव न स्यादस्मात् पञ्जरात्? सा कथयति—"दृढतराः पञ्जरस्य शलाका निबिडतराश्च। यथा त्वं न पलायेथास्तथा गृहस्वामी जागरूको भविष्यति। कथं ते मुक्तिर्भविष्यति? ॥

अत्रान्तरे गृहस्वामी फलहस्तः समागतः। शुकी पलायिता। गृहस्वामी शुकमिमं फलेन रुचिरेणान्नेन च पोषयिष्यति। भाषणं च तं शिक्षयिष्यति। शिक्ष्यमाणाः शुका मनुष्या इव व्यक्तां वाचमुदीरयन्ति। वेदमन्त्रानपि ते पठन्ति। अयमेव शुकानां बन्धने हेतुः ॥

शुकानां रूपमपि रमणीयम्। तेषां पक्षौ हरितौ, चञ्चवश्चरणाश्च लोहिताः। केचन शुकाश्चित्रवर्णाः। तेऽतीव रमणीयाः ॥

---

प्रश्नाः—

१. शुकस्य माता कुत्र स्थिता? २. सा पञ्जरस्थं शुकं किं वदति? ३. शुकः तां किमाह? ४. शुकस्य पञ्जरात् मुक्तिः कुतो न भवेत्? ५. कुत्रान्तरे गृहस्वामी समागतः? ६. गृहस्वामी किं करिष्यति? ७. कः शुकानां बन्धने हेतुः? ८. केऽतीव रमणीयाः शुकाः? ९. अनया कथया कः उपदेशः गृह्यते?

२) सन्धत्त— (Combine)

वने + अवसत् = । हरे + अव = ।

गुरो + अध्यापय = । ते + अवदन् = ।

३) The following are the 20 उपसर्गs commonly prefixed to the Roots:

| | | |
|---|---|---|
| अति, अधि, अनु | अप, अपि, अभि, | अव, आ, उत्-उद्, |
| उप, दुस्-दुर्, नि | निस्-निर्, परा, परि | प्र, प्रति, वि, |

सम् and सु.

Note: Two or more of the उपसर्गs may also be combined and prefixed.

e.g. वि + अप + दिश्=व्यपदिशति. 2 उपसर्गौ

सम्+अभि + आ + वर्तते=समभ्यावर्तते. 3 उपसर्गाः ।

४) पर्यायाः—

लता (Creeper) ५-लता प्रतानिनी वीरुत् वल्ली तु व्रततिर्लता ॥

---

कोटर *n* hollow of a tree
मुक्ति *f* letting off
शलाका *f* bar of a cage
निबिड *a* dense, thick
जागरूक *a. m.* wakeful i. e., careful
पक्ष *m* wing.



१७. उलूखलं मर्दलश्च

कस्मिंश्चित् गृहे भजनोत्सवानन्तरं रात्रौ मर्दलः कश्चिदुलूखलस्य समीपे स्थापितः। मित्रमन्तिके दृष्ट्वा मर्दलः कुशलं पृच्छंस्तेन सह सम्भाषते।

मर्दलः—सखे! अपि कुशलं भवतः? अस्मिन् देशे का वार्ता?

उलूखलम्—मित्र? अस्मिन् देशे मां विहाय सर्वेऽपि कुशलिन एव। अहं परं मन्दभाग्यम्!

मर्दलः—कुतस्त्वं मन्दभाग्यम्? कस्ते दुःखहेतुः?

उलूखलम्—सखे! किं ब्रवीमि! तथापि श्रूयताम्— दुर्भगस्य मे शिरसि धान्यानि निधाय स्त्रियः पुरुषाश्च मां

मुसलेन निर्दयं ताडयन्ति । केचिदयोदण्डेनापि मां प्रहरन्ति इत्थं प्रत्यहं महतीं पीडामनुभवामि । किमतः परं कष्टं स्यात् ?

मर्दलः—भद्र ! किमिदं मयि निवेद्यते । अहं त्वत्तोऽपि मन्दभाग्यः । त्वं शिरसि परं ताड्यसे । मां तु ताडने समर्थाः जनाः पार्श्वद्वयेऽपि हस्ताभ्यां ताडयन्ति । विशेषतश्च विवाहोत्सवादौ सभामध्ये तीव्रं ताडयन्तो मामवजानन्ति । नैकोऽपि मामनुशोचति । किन्तु सर्वेऽपि सहर्षं शिरः कम्पयन्तो मम ताडनमभिनन्दन्ति । हन्त ! कस्य वाऽन्यस्य स्यादीदृशी दुर्दशा ।

लोके हि प्रायेण नान्यस्य दुःखमन्यो जानाति ॥

---

१) प्रश्नाः—

१. मर्दलः कदा कुत्र स्थापितः ? २. तस्मिन् देशे के कुशलिनः ? ३. उलूखलं कीदृशीं पीडामनुभवति ? ४. मर्दलस्य दुर्दशा कीदृशी ? ५. पाठादस्मात् क उपदेशो गृह्यते युष्माभिः ?

२) प्रगृह्य सन्धिः (एषु सन्धिः न भवति, अयम् एव प्रगृह्य सन्धिः)

कपी + इमौ = कपी इमौ ।

गुरू + आगतौ = गुरू आगतौ ।

फले + अपि = फले अपि ।

अमी + अश्वाः = अमी अश्वाः ।

३) 'किम्' शब्दस्य रूपै: वाक्यानि पूरयत—

१) युष्माकं पाठशालायां—विशेष: ?

२) रणाय निर्गतस्य भटस्य—प्रवृत्ति: ?

४) उपसर्गयोगादर्थभेद:— Root 'भू' to be भवति with उपसर्ग prefixed has different meanings.

| | |
|---|---|
| अनुभवति (enjoys) ; | परिभवति (disregards); |
| पराभवति (overcomes) ; | प्रभवति (Is able) ; |
| सम्भवति (happens) ; | अभिभवति (defeats) ; |

५) पर्याया:—

उलूखलम् २—उदूखलमुलूखलम् ।

रात्रि: ११ निशा निशीथिनी रात्रि: त्रियामा क्षणदा क्षपा ।

(Night) विभावरीतमस्विन्यौ रजनी यामिनी तमी ॥

---

उलूखल *n.* a wooden mortar used for cleansing rice

कुशल *n.* welfare

दुर्भग *a. m.* unforunate

मुसल *m. n.* pestle

अयोदण्ड *m.* an iron-bar

प्रवृत्ति *f.* news

वृत्तान्त *m* news.



१८. गजः

मृगजातौ गजः गरिष्ठः। तस्य पादाः स्तम्भा इव स्थूलाः। तस्य कर्णौ शूर्पाविव विशालौ। तस्य नेत्रे तावदत्यल्पे। अथापि सोऽल्पान्यपि वस्तूनि द्रष्टुं शक्नोति। भूमौ स्थितां सूचिकामपि स पश्यति गृह्णाति च॥

गजस्य मुखेऽजगरवल्लम्बमानोऽवयवः शुण्डा। वयं हस्तेन यत् कर्म कुर्मः तत् गजः शुण्डया करोति। अत एव गजस्य शुण्डा 'हस्तः' इति 'करः' इति च व्यपदिश्यते। तेन गजस्य 'हस्ती' 'करी' इति संज्ञे भवतः। शुण्डैव गजस्य नासिका। तयैव श्वसिति गजः। शुण्डाया अग्रे रन्ध्रमस्ति॥

गजः प्रथमं शुण्डया जलमादाय पश्चात् तन्मुखे निषिञ्चति। एवं द्वाभ्यामवयवाभ्यां जलं पिबन् गजः 'द्विपः' इत्याख्यां भजते ॥

गजानां दृढौ तीक्ष्णौ च द्वौ दन्तौ स्तः। तस्मात् ते 'दन्तिनः', 'दन्तावलाः' 'द्विरदाः' इति कथ्यन्ते। शिल्पिनः करिणां दन्तैः रम्याणि महार्घाणि वस्तूनि निर्मान्ति। करेणूनां दन्तौ न स्तः ॥

यद्यपि गजा वन्या जन्तवः, तथापि ते जनैः कौशलेन गृह्यन्ते, शिक्ष्यन्ते च। साधु शिक्ष्यमाणास्ते जनैः कर्तुमशक्यानि कर्माणि कुर्वन्ति। गुरुतराणि दारूणि कर्षन्ति। शिक्षिता अपि गजास्तदा तदा मदेनोन्माद्यन्ति। तदा तान् आधोरणाः निशितेनाङ्कुशेन नियन्त्रयन्ति ॥

---

१) प्रश्नाः—

१. गजस्य पादाः कीदृशाः? २. कर्णौ कीदृशौ? ३. नेत्रे कीदृशे? ४. नेत्रयोः शक्तिः कीदृशी? ५. गजस्य शुण्डा हस्तः 'करः' इति व्यपदिश्यते, तत्र कारणं किम्? ६. गजः 'करी' इति 'द्विपः' इति 'दन्ती' इति च कुतोऽभिधीयते? ७. करिणां दन्तैः क उपयोगः? ८. शिक्ष्यमाणा गजाः कानि कर्माणि कुर्वन्ति? ९. आधोरणाः केन कदा गजान् नियन्त्रयन्ति?

२) लत्व सन्धि:— (तकारस्य दकारस्य वा 'ल' कार: भवति)

अजगरवत् + लम्बते=अजगरवल्लम्बते ।

भगवत् + लीला=भगवल्लीला ।

सुहृद् + लाभ:=सुहृल्लाभ: ॥

३) उपसर्गयोगादर्थभेद:— दिश् दिशति—(to give) । उपदिशति (instructs) व्यपदिशति, (calls) आदिशति, (Commands, निर्दिशति, (directs) उद्दिशति, (Points) सन्दिशति (sends message)

४) अतिशयनार्थका: शब्दा: (Degrees of Comparison)—

| Positive | Comparative | Superlative |
|---|---|---|
| गुरु: | गरीयान् | गरिष्ठ: |

५) पर्याया:-

गज: १२-दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विप: ।
मतङ्गजो गजो नाग: कुञ्जरो वारण: करी ।
आधोरण: ४-आधोरणा हस्तिपका हस्त्यारोहा निषादिन: ॥

---

गरिष्ठ *a. m.* hugest
शूर्प *m. a.* winnowing basket
सूचिका *f.* a needle
अजगर *m* a huge serpent which swallows goats
नासिका *f* nose
रन्ध्र *n.* a hole
शिल्पिन् *m* Artisan
करेणु *f.* a female elephant
दारु *n.* timber
निशित *a. m.* sharpened



१९. दश मूढाः

मूढानां चेष्टितानि प्रायेण विनोदावहानि। यथा हि—एकदा दश मूढाः देशाटनाय प्रस्थिताः। किञ्चिद्दूरं गतानां तेषामुपस्थिता काचिदगाधा नदी। बाहुभ्यां तरन्तस्ते कथमपि नदीं तीर्त्वा पारं गताः॥

आसीत् तेषां मध्ये कश्चन वृद्धः। 'स किं सर्वे तीरमनुप्राप्ताः?' इति जिज्ञासमानस्तान् एकैकशो गणयामास। परं नवैव परिगणितास्तेन। तता स आक्रोशत्—'अहो! वयं दश प्रस्थिताः। इदानीं नवैव स्मः। नूनम-

स्माकमेको नद्यां निमग्नः । गवेषयत तम्' इति । ततस्तेषा-मेकैकोऽपि गणनां चकार । परं नवैव दृश्यन्ते । ततस्तेषां व्याकुलीभूतानां महान् कोलाहलः समजनि ।

तत्रैव नातिदूरे कस्यचिदृषेः आश्रमोऽवर्तत । तत्र वसन् ऋषिः तेषां विचेष्टितमवलोक्य उच्चैर्जहास । तस्य हासशब्दं श्रुत्वा मूढास्तरसा समुपसृत्य हासकारणमपृच्छन् । ऋषिराह— 'अहो! अनात्मज्ञा यूयम् । युष्माकमेकैकोऽपि नात्मान-मगणयत् तेनायं व्यामोहः सञ्जातः' इति ।

तदाकर्ण्य ते मूढाः सलज्जमधोमुखाः प्रययुः ।

---

१) प्रश्नाः—

१. दश मूढाः कुत्र प्रस्थिताः ? २. कथं नदीमतरन् ? ३. तेषां व्याकुलीभावस्य को हेतुः ? ४. ऋषिः कुत उच्चैर्जहास ? ५. स तान् किमाह ? ६. मूढाः कथं ययुः ?

२) अश्त्व सन्धिः—(जश् = , ज, ब, ग, ड, द ' वर्णाः) बकारश्च भवति)

वाक् + रसः = वाग्रसः ।

सम्राट् + भरति = सम्राड्भरति ।

किञ्चित् + दूरम् = किञ्चिद्दूरम् ।

अप् + धारा = अब्धारा ॥

3) उपसर्गयोगादर्थभेदः—स्था (to stand) तिष्ठति

अनुतिष्ठति (Performs) अधितिष्ठते (Sets),

उपतिष्ठति (उपतिष्ठते) (approaches) सन्तिष्ठते (ends)

4) पर्यायाः—

मूढः ६—अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ।

वेगः ६—जवो वेगस्तथा रंहस्तरसी तु रयः स्यदः ।

तीरम् ५— कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ॥

---

पारम् *n* opposite bank of a river

एकैकशः *in*, one by one

एकैक *m* every one

व्याकुलीभूत *m. a.* perplexed

कोलाहल *m* a loud and confused noise

अनात्मज्ञ *a. m.* one who does not know himself

व्यामोह *m* perplexity

स्रज् *f.* a garland

सम्राज् *m* a paramount sovereign.




## २०. कुक्कुटो रत्नं च

एकदा कुक्कुटः कश्चित् पादेनावकरं किरन् ।
ददर्श भासुरं किञ्चिद्रत्नं श्रेष्ठिगृहाङ्गणे ॥
कुक्कुटस्यानभिज्ञस्य रत्नलाभेन किं फलम् ?
रत्नमूल्यं कियद्वेति किं स जानाति मन्दधीः ॥
अतः स पक्षौ विस्तृत्य विधूय वदनं मुहुः ।
तारं रटन् वक्रवक्त्रस्तद्रत्नं समगर्हयत् ॥
रे रत्नं ! शिरसा धृत्वा लोकस्त्वामभिनन्दतु ।
किन्तु धान्यकणेन त्वं नैव सादृश्यमर्हसि ॥
इत्युक्त्वा स च तद्रत्नं पादेनाक्षिप्य दूरतः ॥
अन्यत्र गतवान् शीघ्रं धान्यान्वेषणतत्परः ॥

१) प्रश्नाः—

१. कुक्कुटः कुत्र किं कुर्वन् कीदृशं रत्नं ददर्श ? २. किं कृत्वा स तद्रत्नमगर्हयत् ? ३. कथमगर्हयत् ? ४. अनन्तरं स किं कृतवान् ?

२. सन्धिं विश्लेषयत—

किञ्चिद्रत्नम् । नैव । पादेनाक्षिप्य । तस्मा आम्रफलम् । कियद्धेति । सोऽवर्धत । बुद्धिरपि । इत्युक्त्वा ॥

४) पर्यायाः—

पक्षः ६—गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहम् ॥

---

विकिरन् *a. m.* scattering
अङ्गण *n. a.* a courtyard
कियत् *n, n.* how much
विधूय *in.* having shaken
धान्यकण *m.* a grain of corn
सादृश्य *n.* equality
आक्षिप्य *in* throwing off

---



२१. मातापुत्रयोः संभाषणम्

कस्मिंश्चित् दिने सुगुणो नाम बालकः मात्रा सह गृहस्य बहिर्वेदिकायामास्त । तदा कश्चन याचकः समेत्य 'मातः ! भिक्षां देहि' इत्ययाचत ॥

तदा पुत्रो मातरं पृच्छति—

पुत्रः—अम्ब ! कोऽयम् ?

माता—वत्स ! अयं याचकः ।

पुत्रः—याचकः किं करोति ?

माता—स भिक्षां याचते । याचनेन यल्लभ्यते तेनोदरं पूरयति ।

पुत्रः—किमित्ययं याचनेनोदरं पूरयति? कस्मान्न कर्म करोति?

माता—वत्स! अयमलसः! आलस्येन बाल्ये पाठालयमगत्वा विद्याम् अनभ्यस्य कालमनयत्। न किञ्चिदपि कर्म परिशीलितं तेन।

पुत्रः—विद्यया कथं जीविका निर्वर्त्यते?

माता—विद्यया किं न सिध्यति! विद्यया बुद्धिर्विकसति। बुद्धिमन्तो जनाः स्वाभीष्टं कर्म कर्तुं प्रभवन्ति। तेन सुखेन जीविकां निर्वर्तयन्ति। विद्वान् सर्वत्र पूज्यते।

पुत्रः—अस्तु, अयं याचते खलु। किमनेन प्रतिदिनं भिक्षा लभ्येत?

माता—कथं लभ्येत! कदाचिल्लभ्यते, कदाचिन्न लभ्यते। यदा जनाः भिक्षां न वितरन्ति तदाऽयमञ्जलिं बद्ध्वा पादयोः पतित्वा तान् याचति। यदि तदाऽपि न किञ्चिल्लभते तर्हि बुभुक्षया पीडितः कुत्रापि गत्वा चोरयति।

पुत्रः—किं न चोरं राजपुरुषा बध्नन्ति?

माता—यदि राजपुरुषाः पश्यन्ति तर्हि तं बध्नन्ति, ताडयन्ति, कारां च प्रवेशयन्ति।

पुत्रः—अम्ब! अहमपि यदि न बाल्ये विद्यामभ्यस्ये तर्हि मयाऽपि याचितव्यं स्यात्। किं न?

माता—जात—! कः सन्देहः ! याचितव्यमेव भवेत् ।
पुत्रः—एवं चेत् अहं श्वः प्रभृति पाठालयं गमिष्यामि, विद्यां चाभ्यसिष्यामि ॥
माता—वत्स । आलस्यं विहाय विद्याभ्यासे यतस्व । उद्योगी भव । विद्यावन्तमुद्योगिनं च नरं लक्ष्मीः स्वयमेवोपैष्यति । तथा च सुभाषितरत्नाकरः—
"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः" इति ॥

---

१) प्रश्नाः—१. कदा कः 'भिक्षां देहि' इत्ययाचत! २. कुतः स याचकः संवृत्तः ! ३. कथं विद्यया जीविका निर्वर्त्यते! ४. कथं चोरो भवति कश्चित् ! ५. कदा याचितव्यं भवेत्! ६. कं लक्ष्मीः स्वयमेवोपैष्यति ! ७. अस्मिन् पाठे कः उपदेशः गृह्यते !

२) अनुनासिक सन्धिः—('ङ, ञ, ण, न, म' इमे अनुनासिकाः । वर्णक्रममनुसृत्य 'क' कारस्य 'ङ' कारः इत्येवम् आदेशः भवति)

वाक् + माधुर्यम् = वाङ्माधुर्यम् ।
परिव्राट् + नम्यते = परिव्राण्नम्यते ।
कस्मात् + नास्ति = कस्मान्नास्ति ॥

३) विरुद्धपदानि—कृत्वा × अकृत्वा अभ्यस्य × अनभ्यस्य
गत्वा × अगत्वा विहाय × अविहाय

४) न क्रुध्येत्, मा गमः, अनादृत्य, एकैकशः, सहसैव, प्रभृति, एतान्युपयुज्य वाक्यानि रचयत ॥

५) उपसर्गयोगादर्थभेदः—

तृ (to cross) तरति । अवतरति (descends), वितरति (gives), निस्तरति (over comes)

(अस्—to throw 4th conjugation तुरीयगणस्थः)

अस्—अस्यति । अभ्यस्यति—ते, निरस्यति—ते ॥

६) तव्यप्रत्ययान्तः—Potential Participles

याचितव्यम्, गन्तव्यम्, कर्तव्यम्, द्रष्टव्यम् इत्यादयः ॥

७) पर्यायाः—

माता ४ स्वसा २—जनयित्री प्रसूर्माता जननी भगिनी स्वसा ।

याचकः ५—वनीपको याचनको मार्गणोऽर्थी च याचकः ।

बुद्धिः १४—बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः ।
प्रेक्षोपलब्धिश्चित्संवित् प्रतिपज्ज्ञप्तिचेतनाः ॥

बहिर्वेदिका *f.* an outer altar
याचक *m.* a beggar
उदर *n* belly
आलस्य *n.* idleness
जीविका *f* livelihood
स्वाभीष्ट *a. n.* liked by oneself.
अञ्जलि *m.* hands opened and folded together
कारा *f.* a jail
बुभुक्षा *f.* hunger
याचितव्य *a. n.* has to be begged
उद्योगिन् *a. m.* Industrious
लक्ष्मीः *f* fortune.



## २२. चोरो बालकः

कश्चित् बालकः पाठशालायां कस्यापि सहाध्यायिनः पुस्तकमचोरयत् । तत् स गृहमानीय मातुर्हस्तेऽर्पितवान् । तया स तदा तीव्रं दण्डनीय आसीत् । तदकृत्वा सा तस्य कृत्यमभिनन्द्य तस्मा आम्रफलमेकं भक्षणार्थमयच्छत् ॥

गच्छति काले यथा यथा सोऽवर्धत तथा तस्य स्थेयबुद्धिरपि वृद्धिं गता । किं बहुना ! कालेन स महांश्चोरः संवृत्तः ।

एकदा स रात्रौ सन्धिच्छेदेन कस्यचिद्धनिकस्य गृहं प्राविशत् । गाढं निद्रिता अपि तद्गृहस्था जनाः सन्धिच्छेद-

शब्देन प्रबोधं गताः। तान् सर्वान् स व्यापाद्य महार्घाणि रत्नान्यादाय प्रतस्थे। पथि गच्छन् स रक्षापुरुषैर्गृहीतस्ताडितो दण्डाधिपस्य समीपं नीतश्च॥



दण्डाधिपः चोरस्य वृत्तान्तम् अवगत्य तस्य वधदण्डं व्यधात्। तदनु वध्यभूमिं नीयमानः स राजपुरुषानब्रवीत्—'भो भोः! सकृन्मे मात्रा सह भाषणमनुमन्यध्वम्'—इति। ततस्तैः साक्रन्दं प्रद्रुत आगच्छन्त्या मात्रा सह तस्य भाषणमन्वमन्यत॥

कुमारस्तस्याः कर्णे रहस्यं कथयन्निव तामुपसृत्य तस्याः कर्णं ददंश। 'अहो! मृत्युना गृहीतोऽपि पापोऽयं मात्रे

द्रुह्यति' इत्युच्चैरूचुस्तत्र मिलिता जनाः । तदाकर्ण्य कुमारः—'भो जनाः! नाहं पापः । किन्त्वेषैव पुत्रघातिनी राक्षसी । आम्रफलदानेनैषा मम स्तेयासक्तिमवर्धयत्' इत्युक्त्वा स पूर्ववृत्तान्तं तेभ्योऽकथयत् ॥

---

१) प्रश्नाः—

१. कथं स बालश्चोरः संवृत्तः ? २. स कुतो रक्षापुरुषैर्गृहीतः ? ३. दण्डाधिपः किम् अकरोत् ? ४. वध्यभूमिं नीयमानः स राजपुरुषान् किमब्रवीत् ? ५. माता कथम् अगच्छत् ? ६. तैः किमन्वमन्यत ? ७. कुमारः किं चकार ? ८. तत्र मिलिता जनाः किमूचुः ? ९. तदाकर्ण्य स किमकथयत् ? १०. पूर्ववृत्तान्तः कः ?

५) रुत्वानुस्वार सन्धिः—रुत्वानुस्वार = 'श्' or 'स्' ।

(नकारस्य शकारः सकारः वा भवति ।

ततः पूर्वं अनुस्वारश्च भवति ।)

i. महान् + चोरः = महांश्चोरः ।

ii. कस्मिन् + चित् = कस्मिंश्चित् ।

iii. संशयान् + छिनत्ति = संशयांश्छिनत्ति ।

iv. छात्रान् + ताडयति = छात्रांस्ताडयति ॥

३) उपसर्गयोगादर्थभेदः—मन् (to think) मन्यते । अनुमन्यते (permits) (अपमन्यते—अवमन्यते disregards) संमन्यते = (approves) बहुमन्यते (honours.)

४) पर्यायाः—

बालः २—बालस्तु स्यान्माणवकः ।

युवा ३—वयस्थतरुणो युवा ।

चोरः १०—चोरः कुम्भीलकः स्तेनो दस्यु तस्कर मोषकाः
प्रतिरोधि परास्कन्दि पाटच्चरमलिम्लुचाः ॥

---

चोर *m.* thief

सहाध्यायिन् *m.* a fellow-student

आम्रफल *n.* mango fruit

सन्धिच्छेद *m.* making breaches in a wall

प्रबोध *m.* wakefulness

महार्घ *a. n.* highly valuable

रक्षापुरुष Policeman

दण्डाधिप *m.* chief magistrate

वध्यभूमि *f.* place of execution

सकृत् *in* once

मिलित *a. m.* assembled

पुत्रघातिनी *a. f.* one who has killed her own son

स्तेयासक्ति *f.* habit of stealing



## २३. मूर्खस्योपकारो न कर्तव्यः

कश्चन मूर्खः कदाचित् ग्रामान्तरात् प्रतिनिवर्तमानो निजग्रामगामिनं पन्थानं व्यस्मरत्। अथ पन्थानं पृच्छन्तं

तं मूर्खं जनाः 'नदीतटे दृश्यमानस्य तरोरुपरि वर्त्मना गच्छ'—इत्यवोचन् ॥

ततः स तरुमुपगम्य 'एतस्योपरि खलु मे पन्थाः जनैरुपदिष्टः' इति मत्वा तस्य तरोः पृष्ठमारोहत् । तस्य पृष्ठे सर्पतस्तस्य भारात् तरोः शाखा ननाम । स तां यत्नेनावलम्ब्य यावदतिष्ठत् तावत् कश्चिदाधोरणः गजोपरि स्थितः नद्या आरुह्य तेन पथा समाययौ ॥

तरुशाखावलम्बी मूर्खस्तं हस्त्यारोहं दृष्ट्वा सदैन्यमवोचत्—'महाभाग ! मां गृहाण'—इति । तदाकर्ण्य हस्त्यारोहः करुणया तं तरोरवतारयितुं पाणिभ्यां तस्य पादावग्रहीत् । मूर्खस्तु तरुशाखां नामुञ्चत् । अत्रान्तरे गजो निर्गतः । हस्त्यारोहः शाखाग्रलम्बिनस्तस्य पादयोर्लम्बे ॥

ततः स मूर्खः सम्भ्रान्तो हस्त्यारोहमभ्यधात्—'यदि जानासि तर्हि शीघ्रं किमपि गीतं पठ । गानं श्रुत्वा कोऽप्यागत्य आवामितोऽवतारयेत्'—इति ॥

एवं तेनोक्तः स हस्त्यारोहस्तथा मधुरमगायत् यथा स मूर्खः प्रहृष्टः रसेन करतालिकां दातुं प्रावर्तत । अथ तत्क्षणं सहस्त्यारोहः मूर्खो नद्यां निपत्य विपेदे । पश्यत ! उपकर्तुं प्रवृत्तस्य हस्त्यारोहस्य गतिम् ।

१) प्रश्नाः—

१. पन्थानं पृच्छन्तं मूर्खं के किमवोचन्? २. मूर्खः किमकरोत्? ३. तदा किं संवृत्तम्? ४. तेन पथा कः कथं समाययौ? ५. हस्त्यारोहः किमर्थं मूर्खस्य पादावग्रहीत्? ६. हस्त्यारोहः किमर्थं मूर्खस्य पादयोः ललम्बे? ७. कः किमर्थम् अगायत्? ८. ततः किमभूत्? ९. पाठादस्मात् क उपदेशो गृह्यते?

२) यावत्—तावत्, यदि -तर्हि; अत्रान्तरे, तत्क्षणम्—

एतानि उपयुज्य वाक्यानि रचयत (use the above in your own sentences.)

३) पर्यायाः—

सत्वरम् ११—अथ क्षिप्रमरं शीघ्रं त्वरितं लघु सत्वरम्।
द्रुतं च त्वरितं तूर्णम् अविलम्बितमाशु च ॥
नर्तनम् ६—ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तनम् ॥

---

वर्त्मन् *n.* a way road
पृष्ठम् *n.* upper side
नताम *P.* bent
सदैन्यम् *in.* pitiably [one
महाभागः *a. m.* illustrious
हस्त्यारोह *m.* an Elephant rider
करतालिका *f.* clapping the hands

## २४. जरासन्धः

पुरा किल बृहद्रथो नाम मगधानां राजा बभूव। स काशिराजस्य द्वे अपि सुते पर्यणयत्। महताऽपि कालेन तस्य वंशकरः सुतो नाजायत। अतः स राट् भृशं दुःखितो राज्यं परित्यज्य भार्याभ्यां सह तपोवनमगच्छत्॥

तत्र चण्डकौशिको नाम मुनिः सभार्यं तं तपसि निरतमपश्यत्। अपृच्छच्च तं तपसः कारणम्। पार्थिवश्चात्मनः सन्ततेरभावं कारणं व्यज्ञापयत्॥

तन्निशम्य सत्यवाक् स महर्षिः आम्रफलमेकं तस्मै दत्त्वा जगाद—'इदं फलं सन्ततिं दास्यति। निवर्तस्व। अलं क्लेशकारिणा तपसा'—इति।

तदादाय प्रहृष्टो नृपः पत्नीभ्यां सहितः स्वपुरम् आजगाम। आगत्य च ताभ्यां तत्फलं प्रायच्छत्। ते उभे अपि तत् फलं द्विधा विभज्य तमभक्षयताम्। कालेनैका सजीवं शरीरार्धं प्रासूत, अपरा चापरमर्धम्। भीता धात्री ते अर्धे वनं नीत्वा क्वचिदुत्ससर्ज॥

अथ जरा नाम राक्षसी पर्यटन्ती तं देशमाजगाम। अवलोक्य च ते शरीरार्धे कौतुकेन संयोजयामास। तदेक-

मूर्तिधरो वरः कुमारः समपद्यत। धार्मिकस्य महीक्षितः वंशे वसन्ती सा राक्षसी न तं कुमारं हन्तुमैच्छत् ॥

ततः सा कुमारमादाय राजानमुपगम्याब्रवीत्— 'राजन्! अयं ते सुतः पत्नीद्वये जातः, गृह्यताम्'— इति। भूयः सहर्षं तमादाय जरया सन्धितस्य तस्य 'जरासन्धः' इति नाम चकार ॥

---

१) प्रश्नाः—

१. किं निमित्तं बृहद्रथो राजा भार्याभ्यां सह तपोवनमगच्छत्? २. तत्र कस्तमपश्यत्? ३. सः राजानं किम् अपृच्छत्? ४. राजा किं व्यज्ञापयत्? ६. राजा किमकरोत्? ७. के किमकुरुताम? ८. फलभक्षणेन किमभवत्? ९. जरा नाम राक्षसी किं चकार? १०. पुत्रस्य तथा नामकरणे को हेतुः?

२) श्चुत्व सन्धिः—(तवर्गस्य चवर्गेण संयोगे यथाक्रमं चवर्गः भवति)

तस्मात् + च = तस्माच्च

जलात् + जायते = जलाज्जायते।

अग्निन् + जयति = अग्रीञ्जयति।

तत् + छलम् = तच्छलम्।

सुहृत् + छत्र = सुहृच्छत्र ॥

३) सन्धि विश्लेषयत—(split)

पादावग्रहीत् । यल्लभ्यते । दण्डनीय आसीत् । प्राविशत् । अपृच्छच्च । कालेनैका । चात्मनः । तदैकमूर्तिधरः ।

४) उपसर्गान् पृथक्कृत्य दर्शयत—

आरभत । उद्धरन्ति । समाययौ । सञ्चरति ।

५) उपसर्गयोगादर्थभेदः—

१) नी (to lead) = नयति । आनयति (brings)

निर्णयति (decides) परिणयति (marries)

अनुनयति (passifies) अपनयति (removes)

उपनयति (leads near) विनयति–ते (tames)

२) गम्, गच्छ् (to go) गच्छति, अवगच्छति (understands)

उद्गच्छति (Rises) निर्गच्छति (goes out)

अनुगच्छति (follows) अधिगच्छति (attains)

आगच्छति (comes) उपगच्छति (approaches)

प्रतिगच्छति (goes towards) संगच्छति (unites)

३) भज् (to serve) = भजति । विभजति (divides)

४) सृज् (to create) = सृजति संसृजति (joins)

विसृजति-उत्सृजति (sends)

६) पर्यायाः—

राजा ८—राजा राट् पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः ।

कुतूहलम् ४ कौतूहलं कौतुकं च कुतुकं च कुतूहलम् ।

सन्तोषः १२—मुत् प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः ।
स्यादानन्दथुरानन्द, शर्मशातसुखानि च ॥

७) नानार्थाः—(Words having various meanings)

| Page | Reference | |
|---|---|---|
| | | स्वर्गेषुपशुवाग्वज्र दिङ्नेत्रघृणिभूजले । |
| 8 | गो | लक्ष्यदृष्ट्यां स्त्रियां पुंसि गौर्लिङ्गम् ॥ |
| 58 & 90 | अहो. | अहो धिगर्थे शोके च करुणार्थविषादयोः |
| | | संबोधने प्रशंसायां विस्मये पादपूरणे । |
| | | असूयायां वितर्के च प्रायशोऽहो प्रयुज्यते |
| | | अहो बतानुकम्पायां खेदामन्त्रणयोस्तथा ॥ |
| 93 | कुलम् | कुलं गोत्रं च गेहे च सजातीयगणेऽपिच॥ |

---

वंशकर *a. m.* founding a family
निरत *a. m.* engaged in
सत्यवाक् *a. m.* one whose words are true
धात्री *f.* a nurse
उत्ससर्ज *P.* threw away
कौतुक *n.* curiosity
संम्बिलित *a. m.* joined together
व्यज्ञापयत् *P.* informed
जगाद *P.* told



## २५. चन्द्रोदयः

पश्य ! पूर्वाद्रिशिखरे चन्द्रमाश्चारुमण्डलः ।
भाति क्रीडाङ्गणे न्यस्तः सौवर्ण इव कन्दुकः ॥ १

अथवा तमसा व्याप्तं जगद्दीपयितुं क्षमः ।
सर्वानन्दकरो विद्युत्प्रदीप इव भात्ययम् ॥ २

अथवा व्योमकासारे नक्षत्रकुमुदान्विते ।
पयोदशैवलाकीर्णे भात्ययं राजहंसवत् ॥ ३

भासुरैस्तस्य किरणैः अभिव्याप्ता वसुन्धरा ।
हेमद्रवविलिप्तेव भाति सर्वमनोहरा ॥ ४

भासयन् जगतीं सर्वां घनध्वान्तं व्यपोहयन् ।
चन्द्रश्चन्द्र इवाभाति न तस्य सदृशः क्वचित् ॥ ५

१) प्रश्नाः—

१. चन्द्रमा कः क इव भाति ? २. वसुन्धरा का इव भाति ? केन हेतुना ? ३. कीदृशस्य तस्य न सदृशोऽस्ति ?

२) ष्टुत्व सन्धिः—(तवर्गस्य टवर्गेण योगे यथाक्रमं टवर्गः भवति)

उत् + टङ्कते=उट्टङ्कते । चक्रिन् + ढौकसे = चक्रिण्ढौकसे ।

तद् + टीका = तट्टीका । षड् + नवतिः = षण्णवतिः ॥

३) पर्यायः—

चन्द्रः २० —हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ।
विधुः सुधांशुः शीतांशुः ओषधीशो निशापतिः ।
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ।
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ॥

नक्षत्रम् ६—नक्षत्रमृक्षं भं तारा तारकाऽप्युडु वा स्त्रियाम् ॥

---

पूर्वाद्रि *m.* the eastern mountain behind which the Sun and the Moon are supposed to rise

चन्द्रमस् *m.* moon

विद्युत्प्रदीप *m.* electric light

तमस् *n.* darkness

अभिव्याप्त *a. m.* covered with

क्षम *m.* capable

भासुर *a. m.*, shining

कासार *m. n.* a lake

कुमुद *n.* a night lotus

पयोद *m.* a cloud

शैवल *n.* moss

वसुन्धरा *f.* earth

हैमद्रव *m.* gold fluid

घन *a. m.* thick

ध्वान्त *n.* darkness

## २६. पितापुत्रयोः संभाषणम्

एकस्मिन् दिवसे गोपालो नाम बालकः पाठशालायां गोविन्दं नाम सहपाठिनं दुर्वचनैरनिन्दत्। तां प्रवृत्तिमुपाध्यायो गोपालस्य पित्रे सन्दिष्टवान्। पिता सायं पाठालयादागतं गोपालमाहूय, पृच्छति—

पिता—वत्स! अद्य पाठालये त्वया किमपि दुश्चेष्टितं कृतमिति श्रुतं मया। अपि तत् सत्यम्?

पुत्रः—तात! सत्यमेव तत्। प्रथमं गोविन्दो मामनिन्दत्। पश्चादहं तमनिन्दम्। स मां प्राहरत्। अहमुच्चैराक्रोशम्। सोऽप्याक्रोशत्।

पिता—तदानीमुपाध्यायः किं नासीत्?

पुत्रः—आसीदुपाध्यायः। सोऽध्यापयन्नवर्तत। आवयोराक्रोशं श्रुत्वा स भृशं कुपितोऽभूत्।

पिता—कुपितः किमकरोत्?

पुत्रः—स सत्वरं पीठादुत्थाय आवयोः समीपम् आगतः।

पिता—ततः किमकरोत्?

पुत्रः—ततः उपाध्यायः 'अरे! हस्तं प्रसारय' इति गोविन्दमवोचत्। गोविन्दो हस्तं प्रासारयत्। ततस्तं हस्ते वेत्रकाष्ठेनाताडयत्।

पिता—मन्ये तद्वत् त्वयाऽपि दुश्चेष्टितस्य फलम् अनुभूतमिति।

पुत्रः—तात! मामप्युपाध्यायो 'हस्तं प्रसारय' इत्यवादीत्। नाहं प्रासारयम्।

पिता—रे! उपाध्यायस्य वचनं न कृतम्! अस्तु। ततः किमभूत्?

पुत्रः—ततो मामुपाध्यायः संरुष्टः 'पुस्तकानि गृहीत्वा त्वमितो याहि' इत्यवोचत्। अहं दण्डभयेन ततो निर्गत्य गृहमागतः।

पिता—अरे दुष्ट! दण्डभयेन ततो निर्गतस्त्वं द्विगुणं दण्डमर्हसि। (इत्युक्त्वा स वेत्रकाष्ठं हस्तेन गृहीतवान्)

पुत्रः—तात! अयमेकोऽपराधः क्षम्यताम्। इतः परं नैवं करिष्यामि।

पिता—वत्स! तव सत्यवचनेन तुष्यामि। इतः परमीदृशे कर्मणि मा प्रवर्तस्व। आचार्यदेवो भव। सतां मतिमतां च बालकानां पन्थानमनुयाहि।

'अकृत्वा परसन्तापम् अगत्वा खलमन्दिरम्।
अनुत्सृज्य सतां वर्त्म यत् स्वल्पमपि तद्बहु'॥

(सुभाषितरत्नाकरात् उद्धृतम्)

१) प्रश्नाः—

१. कां प्रवृत्तिमुपाध्यायः गोपालस्य पित्रे सन्दिष्टवान्? २. गोपालस्य पिता किमकरोत्? ३. गोपालेन पाठालये कृतं दुश्चेष्टितं किम्? ४. किमर्थं सः तथा अकरोत्? ५. उपाध्यायः किमिति गोपाले कुपितोऽभूत्? ६. स कुपितः किमकरोत्? ७. पिता कुपितः किं व्यधात्? ८. कथं पितुः कोपः शान्तः? ९. पिता पुत्रं किमुपदिष्टवान्?

२) सन्धि विश्लेषयत—(split up)

सौवर्ण इव । मात्सर्यम् । चन्द्रश्चन्द्रः । विलिप्तेव ।
सहसैव । एतस्योपरि । तस्मा आम्रफलम् ॥

३) अनुनासिकद्वित्वसन्धिः—(ह्रस्वात् परस्य नकारस्य अचां योगे द्वित्वं भवति)

अध्यापयन् + अवर्तत = अध्यापयन्नवर्तत ।
एकस्मिन् + अहनि = एकस्मिन्नहनि ।
सन् + अच्युतः = सन्नच्युतः ।
कथयन् + इव = कथयन्निव ॥

४) उपसर्गयोगादर्थभेदः—वृत् (to be) = वर्तते ।

अतिवर्तते (Overtakes), अनुवर्तते (follows),
परिवर्तते—विवर्तते (turns round), प्रत्यावर्तते—
निवर्तते (comes back) उपावर्तते (approaches)

५) पर्यायाः—

पुत्रः ६—आत्मजस्तनयः सूनुः सुतः पुत्रस्तनूभवः ।

पिता ३—तातस्तु जनकः पिता ।

कोपः ७—कोपक्रोधामर्षरोषप्रतिघाः रुट्क्रुधौ स्त्रियाम् ।

सत्यम् ६—सत्यं तथ्यमृतं सम्यक् यथार्थोऽवितथं तथा ॥

---

दुश्चेष्टित *n.* a wicked act

पश्चात् *in* afterwards

आक्रोश *m.* a loud cry

वेत्रकाष्ठ *n.* cane

दण्डभय *n.* fear of punishment

द्विगुण *n.* double

अपराध *m.* a fault

सन्ताप *m.* pain

मन्दिर *n.* house

अनुत्सृज्य *in.* not having given up

---

## २७. महाकविः श्रीकालिदासः

पुरा भोजस्य राज्ञः सभायां परश्शता कवयोऽभूवन्। तेषामेकः कालिदासो नाम। कालिदासः प्रतिभया सर्वानन्यान् कवीनत्यशेत तेन भोजराजस्य तस्मिन् महानादरः। तमेव स कवीनां चक्रवर्तिनममन्यत॥

इतरे कवयः तदसहमानाः परोक्षे भोजं राजानमनिन्दन्। अयं वृत्तान्तः कथञ्चित् भोजस्य कर्णमागतः।

एकस्मिन्नहनि राजा सर्वान् कवीनाहूय 'क-ख-ग-घ' इत्येतां 'समस्यां' दत्वा तानब्रवीत्—'यः समस्यामिमं पूरयिष्यति स एव कवीनां चक्रवर्ती भविष्यति' इति। एवमुक्त्वा तान् विससर्ज॥

गृहमेत्य सर्वे कवयः सर्वान् व्यापारान् परित्यज्य समस्यायाः पूरणे निरता बभूवुः। परं नैकोऽपि समस्यां पूरयितुं शशाक। परेद्युस्ते राजसभामेत्य म्लानमुखाः तस्थुः॥

कालिदासस्तु सभां प्रति चलन् मार्गे तालपत्रमयं पुस्तकमादाय पाठशालां गच्छन्तीं बालिकामपश्यत्। सा च तं दृष्ट्वा सविनयं प्रणनाम। तेन तस्यां प्रीतः कविः तया सह सँल्लपति—

कालिदासः—का त्वं बाले ?

बालिका—काञ्चनमाला ।

कालिदासः—कस्याः पुत्री ?

बालिका—कनकलतायाः ।

कालिदासः—हस्ते किं ते ?

बालिका—तालीपत्रम् ।

कालिदासः—का वा रेखा ?

बालिका—क-ख-ग-घ ॥

तया सहैवं सँल्लप्य कालिदासः सभामगच्छत् । ततो राजा प्राह—'भो भोः कवयः ! कवयः ! पठ्यतां यदि पूरिता समस्या'। सर्वे निर्वचना अधोमुखाः स्थिताः । अथ कालिदासः पीठादुत्थाय व्यजिज्ञपत्—'राजन् मया पूरिता समस्या । राजा प्राह—' पठ्यताम्' कालिदासः पठति—

का त्वं बाले ? काञ्चनमाला
कस्याः पुत्री ? कनकलतायाः ।
हस्ते किं ते ? तालीपत्रं
का वा रेखा ? क—ख—ग—घ ॥

श्लोकमिमं श्रुत्वा सर्वेऽपि कवयः त्यक्तमत्सराः कालिदासमेव कवीनां सार्वभौममन्वमन्यन्त ॥

१) प्रश्नाः—

१. कालिदासो नाम कविः कुत्रासीत् ? २. कः कुतस्तं कवीनां चक्रवर्तिनममन्यत ? ३. इतरे कवयः किम्कुर्वन् ? ४. राजा कां समस्यां दत्वा तान् किमब्रवीत् ? ५. सर्वे कवयः किं चक्रुः ? ६. अपि ते समस्यामपूरयन् ? ७. कालिदासः कथं तामपूरयत् ? ८. कालिदासेन रचितः श्लोकः कः ? ९. श्लोकमिमं श्रुत्वा सर्वेऽपि किमकुर्वन् ?

२) छत्वसन्धिः—तकारात् दकारात् वा परस्य शकारस्य 'छकारः' भवति

तत् + शिवः = तच्छिवः ।

तत् + श्लोकेन = तच्छ्लोकेन ।

तत् + श्रुत्वा = तच्छ्रुत्वा ।

अवदत् + शठः = अवदच्छठः ।

मृद् + शकटिकम् = मृच्छकटिकम् ॥

३) उपसर्गयोगादर्थभेदः—

लप् (to say,=लपति । प्रलपति, (chatters)

विलपति (Cries), आलपति-सँल्लपति (converses)

४) पदानाम अर्थः—

१) चक्रवर्ती सार्वभौमो नृपोऽन्यो मण्डलेश्वरः ।

२) समस्या तु समासार्था किंवदन्ती जनश्रुतिः ।
३) विप्रलापो विरोधोक्तिः सँल्लापो भाषणं मिथः ॥

टिप्पणम्—

१) चक्रवर्ती, सार्वभौमः इति द्वौ पर्यायौ आसमुद्रक्षितीशस्य ।
तदन्यो नृपो मण्डलेश्वरः—इति ।

२) या समासार्था पूरणीयार्था सा 'समस्या' । यथा 'क-ख-ग-घ' इति समस्या । तत्पूरणं यथा । —

का त्वं बाले काञ्चनमाला, कस्याः पुत्री कनकलतायाः ।
हस्ते किं ते तालीपत्रम्, का वा रेखा 'क-ख-ग-घ' ॥

३) विप्रलापः, विरोधोक्तिः—इति अन्योन्य विरुद्धभाषणस्य ।
सँल्लाप -परस्परं युक्तिप्रयुक्तियुक्तं भाषणम् ॥

---

परश्शताः *a. m.* more than a hundred
प्रतिभा *f* genius
अत्यशेत *A.* excelled
चक्रवर्ती *m.* an emperor
परोक्षे *in* behind one's back
समस्या part of a stanza given to be completed
व्यापार *m.* engagement
परेद्युः *in* next day
म्लानमुखाः *a. m.* with their dejected faces
तालीपत्रमय *a. n.* consisting of palm leaves
निर्वचनाः *a. m.* without words
त्यक्तमत्सराः *a. m.* giving up envy.

## २८. सीताविवाहः

पुरा मिथिलायां जनको नाम राजा बभूव। तस्य सुता सीता नाम। सा रूपे शीले चानुपमा बभूव। तां परिणेतुमिच्छन्तोऽनेके राजकुमाराः जनकाय दूतान् प्रेषयामासुः॥

जनकस्तु तां वीर्यसम्पन्नाय क्षत्रियकुमाराय दातुमैच्छत्। अतः स तां वीर्येण क्रेतव्यामकल्पयत्। तथा हि—तस्य सकाशे गुरुतरं किमपि धनुरासीत्। 'य इदं धनुरुद्धृत्य अस्मिन् शरं सन्धत्ते स मम सुतां परिणेष्यति' इति जनकः प्रतिजज्ञे॥

तां तस्य प्रतिज्ञां श्रुत्वा शतशो राजकुमाराः समाजग्मुः; परं नैकोऽपि तेषां तद्धनुश्चलयितुमपि शशाक। 'लङ्काधिपती रावणोऽपि साटोपं समेत्य सलज्जं प्रतिनिवृत्तः' इति ज्ञायते॥

सर्वान् राजकुमारान् प्रतिनिवृत्तान् विलोक्य 'को मे दुहितुर्भर्ता भविष्यति!' इति चिन्तापरोऽभूज्जनकः। अत्रान्तरेऽयोध्याधिपतेः दशरथस्य पुत्रः श्रीरामः सलक्ष्मणो विश्वामित्रेण तत्रानीयत। श्रीरामो महर्षेः विश्वामित्रस्य वचनेन लीलयैव तद्धनुरुद्धृत्य यावत् तस्मिन् बाणमारोपयति तावत् तद्धनुर्द्वेधा भग्नमभूत्॥

साधु साध्विति ब्रुवाणाः श्रीरामस्य वीर्यं प्रशशंसुर्जनाः॥
जनकस्य राज्ञो हृदयं प्रहृष्टमभूत्। ततः स दशरथादीन् आनाय्य महता विभवेन सीतारामयोः विवाहोत्सवं निरवर्तयत्॥

तथा च श्रीमद्वाल्मीकिरामायणे बालकाण्डे त्रिसप्ततितमः सर्गः—

'अब्रवीज्जनको राजा कौसल्यानन्दवर्धनम्।
इयं सीता मम सुता सहधर्मचरी तव॥
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना।
पतिव्रता महाभागा छायेवानुगता तव'॥

---

१) प्रश्नाः—

१. कां परिणेतुमिच्छन्तोऽनेके राजकुमाराः कस्मै दूतान् प्रेषयामासुः? २. जनकः किं प्रतिजज्ञे? ३. तस्य प्रतिज्ञां श्रुत्वा के समागताः? ४. किंनिमित्तं चिन्तापरोऽभूज्जनकः? ५. अत्रान्तरे कस्तत्रानीयत? ६. धनुः कदा द्वेधा भग्नमभूत्? ७. के कथं प्रशशंसुः? ८. कस्य हृदयं प्रहृष्टमभूत्? ९. ततो जनकः सीताविवाहं कथं निरवर्तयत्?

२) रेफलोप सन्धिः—(द्वयोः रेफयोः संयोगे आद्यस्य रेफस्य लोपः ततः पूर्वस्य अचः दीर्घश्च भवतः)

अधिपतिः + रावणः = अधिपती रावणः।

यतिः + राजते = यती राजते ।

पुनः + रमते = पुना रमते ।

गुरुः + रेजे = गुरू रेजे ।

३) क्रियाविशेषणानि सङ्ख्याव्ययानि—

एकधा (In one way) द्विधा or द्वेधा (In two ways) त्रिधा or त्रेधा, (In three ways) चतुर्धा, पञ्चधा, षड्धा or षोढा, सप्तधा, अष्टधा, नवधा, दशधा, शतधा, सहस्रधा, बहुधा, (In many ways) (अनेकधा) (In various ways) कतिधा (In how many ways)

४) पर्यायाः—

शीलम् ५—निष्ठा शीलं च चारित्रं चरित्रं चरितं तथा ।

दूतः २—स्याद् सन्देशहरो दूतः ॥

---

अनुपमा *f.* matchless

दूत *m.* messenger

वीर्य *n.* valour

क्रेतव्या *a. f.* fit to be bought i. e., won

संधत्ते *A.* fixes

गुरुतर *n.* heavier

परिणेष्यति *P.* will marry

उद्धृत्य *ind.* having taken

सकाशे *m.* in one's possession

शतशः *in* in hundreds

साटोपम् *in* in a stately manner

लीलया *f.* with ease

निरवर्तयत् *A.* performed



## २९. विरक्तः महर्षिः

अहो! रम्यः शान्तश्च अयमाश्रमः। आश्रमस्य पार्श्वे प्रसन्ना नदी प्रवहति। आश्रमं परितस्तरवो लताश्च पुष्पितास्तिष्ठन्ति। अयं महर्षिः इदानीमीश्वरं ध्यायति॥

अस्य निकटे विद्यामभ्यस्यन्ति बहवः छात्राः अयमतीव विरक्तो महर्षिः। नास्य धने स्पृहा वर्तते। महार्घाणि रत्नान्यप्ययं लोष्टवत् पश्यति। अतः शिष्यैः स्वयं भक्त्या दीयमानामपि गुरुदक्षिणां नायं प्रतीच्छति॥

एकदा कश्चित् राजकुमारोऽस्मात् विद्यामध्यैत। समाप्तविद्यः स गुरुं गुरुदक्षिणया तोषयितुमिच्छन् महता धनव्ययेन रत्नालङ्कृतं हैमं कङ्कणद्वयं कारयित्वा ऋषेः समीपमाजगाम॥

ऋषिः सायं नद्यास्तीरे शिलायामासीनः प्रकृतेश्चारुतां पश्यन्नवर्तत। राजकुमारस्तमुपसृत्य कङ्कणद्वयं तस्मै समर्प्य प्राञ्जलिस्तस्थौ। ऋषिस्तयोः कङ्कणयोश्चारुतामवेक्षमाण इव ते निरूपयामास। अथ तयोरेकं स्वयमेव हस्तात् परिभ्रष्टमिति व्याजेन नद्यां पातयामास। अत्रान्तरे राजकुमारः प्रकृतेश्चारुतां पश्यन्नासीत्। विदितवृत्तान्तस्य राजकुमारस्य प्राणाः उत्क्रान्ता इवाभवन्॥

अथ राजकुमारः 'स्वयमेव नद्यां निपत्य तत् ग्रहीष्यामि' इति मत्वा ऋषिमपृच्छत्—'भगवन्! कुत्र तत् पतितम्?' इति। ऋषिरपि व्याकुल इव भूत्वा 'अत्र तत् पतितम्' इति दर्शयन् द्वितीयमपि कङ्कणं नद्यां प्राक्षिपत्। राजकुमारः परिदूनो लज्जितश्च प्रत्यगात्॥

---

१) प्रश्नाः—

१. कीदृशोऽयमाश्रमः? २. अयं महर्षिरिदानीं किं करोति? ३. कुतो नायं गुरुदक्षिणां प्रतीच्छति? ४. शिष्यः राजकुमारः किमकरोत्? ५. ऋषिः किं चकार? ६. कुतो राजकुमारस्य प्राणा उत्क्रान्ता इवाभवन्? ७. ऋषिं किमपृच्छत् ८. ऋषिः किमकरोत्?

२) 'अर्' सन्धिः—(अकारस्य आकारस्य वा ऋकारेण योगे द्वयोः वर्णयोः 'अर्' भवति)

महा + ऋषिः = महर्षिः। वसन्त + ऋतुः = वसन्तर्तुः।

देव + ऋषिः = देवर्षिः । पुरुष + ऋषभः=पुरुषर्षभः ।
सप्त + ऋषयः= सप्तर्षयः । देव + ऋणम्=देवर्णम् ॥

३) उपसर्गयोगादर्थभेदः—वह् (to carry)= वहति ।

१) उद्वहति विवहति (marries,) प्रवहति (flows)
निर्वहति (carries out) आवहति (Produces)

२) क्षिप् (to throw)=क्षिपति । अधिक्षिपति (insults)
आक्षिपति (questions) निक्षिपति (places)
संक्षिपति (abridges) प्रक्षिपति (throws)

४) पर्यायाः—

आश्रमः ४ आश्रमो मुनिवेश्म स्यात् पर्णशालोटजोऽस्त्रियाम् ।
तापसः ५—तपस्वी तापसः पारिकाङ्क्षी वाचंयमी मुनिः ॥
ऋषिः २, वर्णी २—ऋषयः सत्यवचसः वर्णिनो ब्रह्मचारिणः ॥

---

**अहो** *in.* How great or wonderful
**आश्रम** *m. n.* hermitage
**विरक्त** *a. m.* free from passion
**लोष्टवत्** *in.* like a lump of earth
**अध्यैत** *A.* learnt
**कङ्कणद्वय** *n.* a pair of bangles
**चारुता** *f.* beauty
**प्राञ्जलि** *m.* with hands folded together
**उत्क्रान्त**: *a. m.* departed
**परिद्यून** *a. m.* very much pained.

## ३०. चित्रश्लोकाः (Charming Slokas)

कस्तूरी जायते कस्मात् ?
को हन्ति करिणां कुलम् ?
किं कुर्यात् कातरो युद्धे ?
मृगात् सिंहः पलायते ॥ १

अस्ति कुक्षिः शिरो नास्ति
बाहुरस्ति निरङ्गुलिः ।
अपदो नरभक्षी च
यो जानाति स पण्डितः ॥ २

अपदो दूरगामी च
साक्षरो न च पण्डितः ।
अमुखः स्फुटवक्ता च
यो जानाति स पण्डितः ॥ ३

सीमन्तिनीषु का शान्ता ?
राजा कोऽभूद्गुणोत्तमः ? ।
विद्वद्भिः का सदा वन्द्या ?
तत्रैवोक्तं न बुध्यते ॥ ४

कुलालस्य गृहेऽस्त्यर्धं
तदर्धं हस्तिनापुरे ।

लङ्कायामपि तद्युग्मं
यो जानाति स कोविदः ॥ ५

अम्लानपङ्कजा माला
कण्ठे रामस्य सीतया ।
मुधा बुधा भ्रमन्त्यत्र
प्रत्यक्षेपि क्रियापदे ॥ ६

विराटनगरे रम्ये
कीचकादुपकीचकम् ।
अत्र क्रियापदं वक्त्रे
हैमं दास्यामि कङ्कणम् ॥ ७

---

Note: Each Sloka Contains Questions and their Answers like प्रश्नोत्तरमाला ।

१) उत्तराणि (Answers)

१. (1) मृगात्, (2) सिंहः (3) पलायते—इत्येतानि क्रमेण त्रयाणां प्रश्नानामुत्तरत्वेन द्रष्टव्यानि । २. कञ्चुः (coat) । ३. लेखः (Letter) । ४. प्रति-प्रश्नम आद्यन्ताक्षरयोः मेलने तत्तत्प्रश्नस्योत्तरं सम्पद्यते—सीता, राम·, विद्या । ५. (1) कुम्भः (2) कर्णः (3) कुम्भकर्णः । ६. 'प्रत्यक्षेपि' इत्येतत् क्रियापदम् ।

७. 'आट' इति क्रियापदम्, अटतेर्लिट्, (Past tense of अट् to roam) विः, (Bird) आट (wandered) इति छेदः ॥

२) सन्धिं विश्लेषयत—

पश्यन्नवर्तत । लीलयैव । बाहुरास्त । तत्रैवोक्तम् ॥

३) किं बहुना, कथञ्चित्, नाम—एतान्युपयुज्य वाक्यानि रचयत ॥

४) उपसर्गयोगादर्थभेदः—

ज्ञा (to know)=जानाति । अनुजानाति (Permits), अवजानाति (Disregards), प्रतिजानाति (Promises)

५) पर्यायाः—

हस्तः ८—भुजबाहू प्रवेष्टो दोः पाणिर्हस्तः शयः करः ॥

---

कस्तूरी *f.* musk
कुल *n.* a herd
कातर *a m.* cowardly
मृग *m.* a deer
कुक्षि *f.* belly
साक्षर *a. m.* possessed of letter
सीमन्तिनी *f.* a woman
कुलाल *m.* a potter
युग्म *n.* a pair
कीचक *m.* a bamboo rattling in the wind
हैम *a. n.* made of gold.



## ३१. काकोलूकीयम्

एकदा पक्षिणः सम्भूय मन्त्रयामासुः—'अस्माकं राजा वैनतेयः। स च वासुदेवस्य सेवायां तत्परो नास्माकं कामपि चिन्तां करोति। किं तेन राज्ञा नः प्रयोजनम्? अतोऽन्यं कमपि राज्येऽभिषिञ्चामः'—इति। एवं निश्चित्य तैः भद्राकारम् उलूकम् अवलोक्याभिहितम्—'एष उलूकः अस्माकं राजा भविष्यति। सम्पाद्यन्तां पट्टाभिषेकसम्बन्धिनः सम्भाराः'—इति॥

अथ समानीतानि विविधतीर्थोदकानि। प्रदत्तं सिंहासनम्। प्रसारितं व्याघ्रचर्म। प्रज्वलिता दीपाः। आरब्धानि वाद्यानि। युवतयो गानम् आरभन्त। आनीता

पट्टमहिषी कृकालिका । उलूकोऽभिषेकार्थं सिंहासनमारोपितः । जरद्गवोऽभिषेकार्थं हेमकुम्भं हस्तेन धृतवान् ॥

अत्रान्तरे वायसः कश्चित् तत्र समायातः । अपृच्छच्च—'अहो ! किमेष सकलानां पक्षिणां समागमो महोत्सवश्च ?'—इति । यथास्थितं निवेदयामासुः पक्षिणः ॥

अथ काको विहस्याह—'अहो ! न युक्तम् एतत् ! किमिति हंसादिषु पक्षिषु विद्यमानेषु दिवान्धस्य क्रियतेऽभिषेकः ! श्रोतव्यं सर्वैः—

"वक्रनासं सुजिह्माक्षं क्रूरमप्रियदर्शनम् ।
उलूकं नृपतिं कृत्वा का नः सिद्धिर्भविष्यति ॥"

तस्योपदेशं श्रुत्वा—'साध्वनेनाभिहितम् । पार्थिवार्थमधिकृत्य भूयः समेत्य मन्त्रयिष्यामहे' इति ब्रुवाणाः सर्वे पक्षिणः यथाभिमतं गताः । दिवान्धः केवलं सिंहासनोपविष्टः कृकालिकया सहास्ते । आह च—'कः कोऽत्र भोः ? किमद्यापि न क्रियतेऽभिषेकः' इति ॥

ततः कृकालिकयाऽभिहितम्—'तवाभिषेके कृतोऽयं विघ्नो वायसेन । गताः सर्वे पक्षिणः । तत् त्वमुत्तिष्ठ । स्वाश्रयं त्वां प्रापयामि'—इति । ततः स दिवान्धः

कृकालिकया दृश्यमानमार्गः सविषादं स्वाश्रयं जगाम । ततः प्रभृति काकानाम् उलूकानां च शाश्वतिकः विरोधः अभवत् ॥

(पञ्चतन्त्रसंग्रहात् उद्धृतम्)

---

Note: काकोलूकीयम्=Natural enemity of the काक and the उलूक (owl). Also the name of the third तन्त्र in पञ्चतन्त्र ।

१) प्रश्नाः—

१. एकदा पक्षिणः सम्भूय किं मन्त्रयामासुः ? २. उलूकमवलोक्य तैः किमभिहितम् ? ३. अथ किं वृत्तम् ? ४. केन कथं पट्टाभिषेकस्य विघ्नः कृतः ? ५. पक्षिणः किम अभिहितवन्तः कृतवन्तश्च ? ६. दिवान्धः किं चकार ? ७. उलूकः कथं स्वाश्रयं गतः ? ८. काकानाम् उलूकानां च विरोधः कथं अभवत् ?

२) पूर्वसवर्ण-सन्धिः—

दिक्+हसति = दिग्घसति । उत् +हृत्य = उद्धृत्य ।

वाक्+ हरति = वाग्घरति । अवदत्+हरिः = अवदद्धरिः ॥

सत् +हेतुः = सद्धेतुः । रामात् +हि = रामाद्धि ।

तत् +हितम् = तद्धितम् । कश्चित्+हयः = कश्चिद्धयः ॥

३) परसवर्ण-सन्धिः—

सम् + कीर्तयति = सङ्कीर्तयति । शत्रुम् + जयति = शत्रुञ्जयति ।

शम् + करः = शङ्करः  सम् + छन्नम् = सञ्छन्नम् ।

सम + चिनोति = सञ्चिनोति । सम् + तरति = सन्तरति ॥

४) उपसर्गान् पृथक्कृत्य दर्शयत—

अभिषिञ्चामः । निरवर्तयत् । प्रत्यगात् । पलायते ॥

५) पर्यायाः—

उलूकः ९—उलूको वक्रनासश्च वायसारातिपेचकौ ।

(owl)  दिवान्धः कौशिको घूको दिवाभीतो निशाटनः ॥

विघ्न ३—विघ्नोऽन्तरायः प्रत्यूहः ॥

क्षणः ५—अथ क्षणः स्यादुद्धर्षो मह उद्धव उत्सवः ।

---

वैनतेय *m.* गरुड  
सम्भार Preparation  
जरद्गव *m.* and old vulture  
हेमकुम्भ *m.* golden jar  
वायस *m.* a crow  
दिवान्ध *m.* an owl  
पार्थिवार्थ *m.* the question of coronation of a King  
भूय *in.* again  
कूकालिका *f.* she-owl  
स्वाश्रय *a. m.* one's abode



२२. फलानि

चित्रेऽस्मिन् आम्रं पनसं कदलीफलं सीताफल द्राक्षा मातुलुङ्गम् इत्यादीनि विविधानि फलानि सन्ति। उपरिष्टात् प्रथमायां पङ्क्तौ वामतस्त्रीण्याम्रफलानि

विद्यन्ते। तान्येकस्मिन् वृन्ते श्लिष्टानि वर्तन्ते। अपक्वानि च तानि। पक्वान्याम्रफलानि रुचिराणि भवन्ति, वर्णश्च तेषां रम्यः॥

आम्राणां दक्षिणतो विद्यमानं पनसफलम्। बहिः कण्टकैरावृतं वर्तते पनसफलम्। तस्य गन्धस्तु मनोहरः। परम् अधिकतया भक्ष्यमाणं तदुदरपीडां जनयति॥

द्वितीयस्यां पङ्क्तौ वामतः कदलीफलानि विद्यन्ते। पक्वानां कदलीफलानां वर्णः पीतः; अपक्वानां तु हरितः। कानिचित् कदलीफलानि रुचिराणि हितावहानि च भवन्ति। कादलानां दक्षिणतः सीताफलं वर्तते, तस्यापि दक्षिणतो द्राक्षागुच्छः॥

तृतीयस्यां श्रेणौ वामभागे विद्यमानानि मातुलुङ्ग-फलानि। इतरेषां केषाञ्चित् फलानां नामान्यप्रसिद्धानि। तेषु कानिचित् विदेशीयानि फलानि॥

फलानामाहारः सात्त्विकः पथ्यश्च। अत एव मुनयः प्रायेण फलैरेव जीविकां वर्तयन्ति। तेन ते नीरोगाश्चिरायुषश्च भवन्ति॥

---

१) प्रश्नाः—

१. चित्रेऽस्मिन् कीदृशानि फलानि सन्ति? २. तेषां

गुणविशेषाः के ? ३. उदरपीडां कदा किं जनयति ? ४. कुतो मुनयः फलैर्जीविकां वर्तयन्ति ? ५. तेन ते कीदृशा भवन्ति ?

२. षट् वर्णाः (Six colours).—

पाण्डुः (Yellowish white) पाटलः (Pale red)
धूसरः (Reddish Brown) धूम्रः (smoky)
शोणः (Tinged red) श्यावः (Dark brown)
अरुणः (Tawny) कपिशः (Brown)

३) पर्यायाः—

पनसः २—पनसः कण्ठकीफलः ।
पीतवर्णः ३—पीतो गौरो हरिद्राभः ।
हरितवर्णः ३—पलाशो हरितो हरित् ।
रक्तवर्णः ३—रोहितो लोहितो रक्तः ॥

---

आम्र *n*. mango fruit
पनस *n*. jack fruit
कादल *n*. plantain fruit
सीताफल *n*. mustard apple
द्राक्षा *f*. grape
वामतः *in*. from left
वृन्त *a*. foot-stalk of leaf of a fruit
श्लिष्ट *a*. sticking to
कण्टक *m*. *n*. a thorn
उदरपीडा *f*. stomach-ache
विदेशीय *n*. *n*. foreign
सात्त्विक *a*. *m*. harmless
नीरोग *a*. *m*. free from disease
चिरायुष *a*. *m*. long-lived.

## ३३. लक्ष्मणस्य प्रस्थानम्

पितुराज्ञया मुदित एव वनं [illegible]ः सीतया सहितो रामः। लक्ष्मणस्तु बलवदह्यत शोकेन। क्षणं स उन्मत्त इव कर्तव्यं नाज्ञासीत्। न खलु रामं विना क्षणमप्यवस्थितं लक्ष्मणेन। अतः स कथं सहतां श्रीरामस्य विरहम्!॥

अथ स धीरः कुमारश्चिरं विचिन्त्य गत्यन्तरमपश्यन् स्वयं रामस्यानुगमने मतिं व्यधत्त। ततः स मातरं सुमित्रामाप्रष्टुं तदन्तिकं जगाम। रामस्य विरहमनुचिन्त्य मृतेव भूमौ पतिता सा लक्ष्मणस्यागमनं नाभ्यनन्दत्। लक्ष्मणस्तु तां सम्बोध्य मृदुना स्वरेणात्मनश्छन्दं न्यवेदयत्॥

तेन वचनेन प्रत्युज्जीवितेव सा झटित्युत्थाय कुमारं गाढमालिलिङ्ग। जगाद च सगद्गदम्—'जात! अद्याहं पुत्रिणी जाता। अद्याहं वीरमाताऽस्मि। अद्य मे शोकस्त्वया शान्तिं गमितः। सर्वथैव रामभद्रमनुयाहि'—इति॥

अथ मुदितः कुमारो मातरं प्रणनाम। सा तं मूर्ध्न्युपाघ्राय कथयति—

" गम्यतामर्थलाभाय क्षेमाय विजयाय च ।
शत्रुपक्षविनाशाय पुनः सन्दर्शनाय च ॥
रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।
अयोध्यामटवीं विद्धि गच्छ तात यथासुखम् " —इति ॥
(श्रीमद्वाल्मीकिरामायणे अयोध्याकाण्डे चत्वारिंशः (४०)सर्गः ॥

अथ लक्ष्मणो देवतायाः प्रसादमिव मातुरुपदेशं मानयन् धनुर्बाणपाणिः श्रीराममन्वगच्छत् ॥

---

१) प्रश्नाः—

१. लक्ष्मणः कुतो न सहते रामस्य विरहम् ? २. सुवीरः कुमारः चिरं विचिन्त्य किमकार्षीत् ? ३. तस्य माता कुतो न तस्यागमनमभ्यनन्दत् ? ४. केन प्रत्युज्जीवितेव जाता सा ? ५. किं जगाद सगद्गदम् ? ६. सा तं मूर्ध्न्युपाघ्राय किं कथयति ? ७. लक्ष्मणः किमकरोत् ?

२) उपसर्गयोगादर्थभेदः—कृ (to do)=करोति ।

अनुकरोति (Imitates), अपकरोति (troubles).
उपकरोति (helps), निराकरोति (Rejects)
परिष्करोति (Polishes) संस्करोति (Cleans)

प्रच्छ् (to ask) =पृच्छति ।  परिपृच्छति (asks with respect)
आपृच्छते (take leave)

३) सन्धिं विश्लेषयत—फलैरेव, हरी राजते, वर्णश्च, कोऽत्र, सर्वथैव, मूर्ध्न्युपाघ्राय ॥

४) लडि रूपाणि निर्दिशत—

| | | | |
|---|---|---|---|
| अटति | इच्छति | उज्झति | अश्नाति |
| ईक्षते | उक्षति | अयते | ईहते |

५) पर्यायाः—

वैरम्   ३—वैरं विरोधो विद्वेषः ।

शोकः   ३—मन्युशोकौ तु शुक् स्त्रियाम् ।

शान्तिः ३—शामथस्तु शमः शान्तिः ।

दान्तिः ३—दान्तिस्तु दमथो दमः ।

मृदु   ५—मसृणं सुकुमारं च कोमलं मृदुलं मृदु ।

वियोगः ४—वियोगो विप्रयोगश्च विश्लेषविरहौ समौ ॥

---

प्रस्थान *n.* going forth, departure
उन्मत्त *a. m.* a mad man
विरह *m.* separation
आप्रष्टुम् *in* to take leave of
विद्धि *P.* understand
छन्द *m.* wish
सगद्गदम् *in* in a faltering tone
मूर्धा *m.* head
अटवी *f.* a forest
प्रसाद *m.* favour.



३४. भूमिः

भूमिः कन्दुकवत् गोलाकृतिः । तस्यास्त्रिषु भागेषु द्वौ भागौ जलम् । त्रिष्वेको भागः स्थलम् । चित्रं पश्य, तत्र शुक्लो भागः स्थलम् । कृष्णो भागः जलम् ।

स्थलभागः एश्या, यूरोप्, आफ्रिका, अमेरिका, आस्त्रेलिया चेति पञ्चखण्डत्वेन विभक्तः ।

जलभागः—शान्तसागरः, अतलान्तिकसागरः, भारतसागरः, उत्तरध्रुवसागरः, दक्षिणध्रुवसागरश्चेति पञ्चसागरत्वेन विभक्तः । समुद्रेषु तत्र तत्र सिंहलादयो द्वीपाः सन्ति ॥

एष्याखण्डः सर्वेषु खण्डेषु विशालतमः। खण्डेऽस्मिन् विद्यया परिष्कारेण च खण्डान्तराण्यतिशयानाऽस्माकं भारत-भूमिर्विराजते। अस्यां परमपावनाः गङ्गा-सिन्धु-गोदावरी-नर्मदा-कावेरीप्रभृतयो नद्यः, परमोन्नता हिमालयप्रभृतयः पर्वताश्च विलसन्ति। अत एव भारतभूमिः अतीव प्रशस्ता॥

यूरोपखण्डोऽनेकैः सार्वभौमैर्विभज्य भुज्यते। तस्मिन् निवसन्तो जनाः श्वेतगात्राः॥

अमेरिकाखण्डो दक्षिणामेरिका उत्तरामेरिका चेति द्वेधा विभक्तः। खण्डोऽयमतीव विशालः समृद्धश्च। गोधूमादीनि धान्यानि प्रभूततया तत्र प्ररोहन्ति॥

आफ्रिकाखण्डो विशाल एव। किन्तु अत्र भूयान् भागो मरुभूमिः। नद्योऽत्र विरलाः। सहाराख्योऽतिविशालः कश्चिन्मरुप्रदेशोऽत्र सुप्रसिद्धः॥

आस्त्रेलियाखण्डः सर्वेषु खण्डेष्वल्पिष्ठः। खनिजानि द्रव्याण्यत्र बाहुल्येन समासाद्यन्ते। ऊर्णाव्यवसायोऽस्मिन् खण्डे प्रसिद्धः॥

शान्तसागरोऽन्वर्थनामा विराजते। अतीव विशालो-ऽप्ययमत्यन्तं शान्तः। अस्मिन्नावर्ताः कल्लोलाश्च न सन्ति।

अतलान्तिकाब्धिरल्पीयानप्यतीव भयङ्करः। भारतसागरो-ऽस्माकं भारतवर्षस्य दक्षिणतो वर्तते ॥

उत्तरध्रुवसागरस्य जलमतीव शीतलम्। तत्रत्येषु द्वीपेषु जनानां वासो दुष्करः। समुद्रेऽस्मिन् शैलतुल्या हिमखण्डाः प्लवन्ते। ते वात्यया नीयमानाः शश्वत् प्रवहणानि निहत्य जले मज्जयन्ति। दक्षिणध्रुवसागरस्य जलं शैत्येन घनीभूतं शिलाप्रायं वर्तते। न तस्मिन् द्वीपाः सन्ति, नापि तत्र प्रवहणानि सञ्चरन्ति ॥

आकाशे परिभ्रमतां गोलानां मध्ये भूमिरन्यतमा। भूगोलापेक्षयाप्युत्तराणि गोलान्तराण्याकाशे विद्यन्ते। सूर्य-चन्द्रौ सर्वाणि नक्षत्राणि च भूगोलवत् गोलानि इति तत्रापि जीवराशयो निवसन्ति इति च गोलशास्त्राभिज्ञाः कथयन्ति ॥

---

१) प्रश्नाः —

१. भूमिः कीदृशी? २. तस्याः कियान् भागो जलम्? ३. कियान् भागः स्थलम्? ४. पञ्च खण्डाः के? ५. पञ्च सागराः के? ६. उत्तरध्रुवसागरः दक्षिणध्रुवसागरश्च कीदृशौ? ७. भारतभूमेः प्राशस्त्यं कथम्? ८. सा कस्मिन् खण्डे अन्तर्भवति?

९. आकाशे विद्यमानानि गोलान्तराणि कानि ? १०. गोलशास्त्राभिज्ञाः किं कथयन्ति ?

२) संख्याविशेषणानि—

प्रथमः, द्वितीयः, तृतीयः, चतुर्थः, (तुर्यः – तुरीयः) पञ्चमः षष्ठः, सप्तमः, अष्टमः, नवमः, दशमः, एकादशः, विंशः, त्रिंशः, चत्वारिंशः, पञ्चाशः, षष्टितमः, सप्ततितमः, अशीतितमः, नवतितमः, शततमः, सहस्रतमः, अयुततमः, लक्षतमः, प्रयुततमः, कोटितमः इत्यादि ॥

३) निर्दिष्टैः क्रियापदैः वाक्यानि पूरयत—

१. गोपालः गृहमागतं मित्रं (पृच्छ्-लट्) स्म ।

२. विदेशं प्रस्थितः पुत्रः पितरौ (अपृच्छ्-लट्) स्म ।

३. सन्तश्छात्राः परस्परं पश्यन्तः (नमस्कृ-लट्) ॥

४) पर्यायाः—

भूमिः २७—भूर्भूमिरचलाऽनन्ता रसा विश्वम्भरा स्थिरा ।
धरा धरित्री धरणी क्षोणिर्ज्या काश्यपी क्षितिः ।
सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनिर्मेदिनी मही ॥

---

गोलाकृति *a. f.* Globular-shaped

सिंहल *m.* Ceylon

खण्ड *m.* a continent

द्वीप *m.* Island

भारतभूमि *f.* The Continent of India

विराजते *A.* shines

श्वेतगात्र *n, m.* having white body

खनिज *n.* grown in mines

प्रभूतता *f.* in plenty

आवर्त *m.* whirlpool

कल्लोल *m.* large wave

विरल *a. m.* rare

सांयात्रिक *m* Sea trader

वात्या *f.* a storm

शिलाप्राय *n.* like rock

प्रवहण *n.* ship

गोधूम *m.* wheat

अन्यतम *a m.* one of many

भूगोलशास्त्राभिज्ञ *a. m.* well-versed in Geography.

## ३५. नीतिमाला—प्रथमो भागः ॥

लक्ष्मीर्वसति जिह्वाग्रे जिह्वाग्रे मित्रबान्धवाः ।
बन्धनं चैव जिह्वाग्रे जिह्वाग्रे मरणं ध्रुवम् ॥ १

प्रियवाक्य प्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ॥ २

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ॥ ३

दिवा पश्यति नोलूकः काको नक्तं न पश्यति ।
विद्याविहीनो मूढस्तु दिवा नक्तं न पश्यति ॥ ४

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥ ५

रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ ६

विद्वत्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥ ७

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥ ८

---

१) प्रश्नाः—

१. जिह्वाग्रे कानि वसन्ति ? २. कुतः प्रियं वाक्यं वक्तव्यम् ?

३. हस्तादीनां भूषणानि कानि ? ४. उलूकः काकः मूढश्च कदा न पश्यन्ति ? ५. कथं विद्या सुखस्य कारणम् ? ६. विद्याहीनाः क इव न शोभन्ते ? ७. विद्वत्त्वं च नृपत्वं च कुतो न तुल्ये ? ८. विद्या, मतिः, धर्मः, शीलं च कुत्र कुत्र धनं भवन्ति ?

२) सन्धत्त—लक्ष्मीः + वसति, न + उलूकः, निर्गन्धाः + इव, न + एव, मूढः + तु, वदन् + एव, हिताः + न ॥

३) समानार्थाः—

नक्तन्दिवम्, रात्रिन्दिवम्, अहर्निशम्=(Day and Night)

४) पर्यायाः—

धनम् १३—द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु ।
हिरण्यं द्रविणं द्युम्नम् अर्थैरविभवा अपि ॥

प्राणी ६—प्राणी तु चेतनो जन्मी जन्तु जन्युशरीरिणः ॥

---

जिह्वाग्र *n.* the tip of the tongue
प्रियवाक्य *n.* a pleasing word
दरिद्रता *f.* poverty
श्रोत्र *n.* the ear
दिवा नक्तम् *in.* day and night
विनय *m.* modesty
पात्रता *f.* the state of being a worthy person
यौवन *n.* youthfulness
निर्गन्ध *a. m.* inodorous
किंशुक *m.* a kind of tree having beautiful red blossoms but without any smell
तुल्य *n.* equal
विदेश *m.* foreign countries
व्यसन *n.* calamity

प्रदोषे दीपकश्चन्द्रः प्रभाते दीपको रविः ।
त्रैलोक्ये दीपको धर्मः सुपुत्रः कुलदीपकः ॥ ९

एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वास्यते तद्वनं सर्वं सुपुत्रेण कुलं यथा ॥ १०

एकेनापि कुवृक्षेण कोटरस्थितवह्निना ।
दह्यते तद्वनं सर्वं कुपुत्रेण कुलं यथा ॥ ११

कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥ १२

न कश्चिदपि जानाति किं कस्य श्वो भविष्यति ।
अतः श्वः करणीयानि कुर्यादद्यैव बुद्धिमान् ॥ १३

न संशयमनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनरारुह्य यदि जीवति पश्यति ॥ १४

नरस्याभरणं रूपं रूपस्याभरणं गुणः ।
गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ॥ १५

क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति ।
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ॥ १६

---

१) प्रश्नाः—

९. चन्द्रः, रविः, धर्मः, सुपुत्रश्च कीदृशाः ? १०. सुपुत्रेण तुल्यः कः ? ११. वनं केन दह्यते ? १२. समर्थादीनां किं किं

नास्ति ? १३. कुतः सः कार्यमद्य कुर्वीत ? १४. कदा नरः भद्राणि न पश्यति ? कदा पश्यति ? १५. नरस्य, रूपस्य, गुणस्य, ज्ञानस्य चाभरणं किम् ? १६. क्षमाशालेन को गुणः सिध्यति ? अत्र दृष्टान्तः कः ?

२) सन्धयः—एकेन + अपि, कः + विदेशः, सः + करणीयः, तत् + वनम्, यतिः + राजते, हरिः + जयति ।

३) विरुद्धपदानि—सुलभः × दुर्लभः । सुपुत्रः × कुपुत्रः ।
सुकरः × दुष्करः । सुवृक्षः × कुवृक्षः ।
सुजनः × दुर्जनः । सुवचः × दुर्वचः ।

४) पर्यायाः—

संशयः ४—विचिकित्सा तु सन्देहः संशयो विशयस्तथा ।
आयुधम् ४—आयुधं तु प्रहरणं शस्त्रमस्त्रं नपुंसके ।
भद्रम् ४—श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ।
भावुकं भविकम् भव्यम् कुशलं क्षेममस्त्रियाम् ॥

---

प्रदोष *m* night fall
दीपक *m* that which gives light
वास्यते *A* is perfumed
व्यवसायी *a. m.* energetic
पर *m.* a foe
करणीयानि *n* which are to be done
संशयं *m* अनारुह्य *in* without entertaining a doubt
आभरण *n* ornament
अतृणं *n* a place free from grass
वह्नि *m* fire
भद्राणि *n* good fortunes

अविचार्य न वक्तव्यं वक्तव्यं सुविचारितम् ।
किञ्च तत्रैव वक्तव्यं यत्रोक्तं सफलं भवेत् ॥ १७
मनसा चिन्तितं कार्यं वचसा न प्रकाशयेत् ।
अन्यलक्षितकार्यस्य यतः सिद्धिर्न जायते ॥ १८
यदशक्यं न तच्छक्यं यच्छक्यं शक्यमेव तत् ।
न जले शकटं याति न च नौर्गच्छति स्थले ॥ १९
चिन्तनीया हि विपदामादावेव प्रतिक्रिया ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ॥ २०
परोऽपि हितवान् बन्धुः बन्धुरप्यहितः परः ।
आहितो देहजो व्याधिः हितमारण्यमौषधम् ॥ २१
मातृवत् परदारांश्च परद्रव्याणि लोष्टवत् ।
आत्मवत् सर्वभूतानि यः पश्यति स पश्यति ॥ २२
छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।
फलान्यपि परार्थाय वृक्षाः सत्पुरुषा इव ॥ २३
गुणवज्जनसंसर्गात् याति स्वल्पोऽपि गौरवम् ।
पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते ॥ २४
महाजनस्य संसर्गः कस्य नोन्नतिकारकः ।
पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम् ॥ २५

---

१) प्रश्नाः—

१७. कीदृशं वचः कुत्र वक्तव्यम्? कथं न वक्तव्यम्? १८. मनसा चिन्तितं कार्यं वचसा कुतो न प्रकाशयेत् १९. शक्य-

मशक्यं च कार्यमुदाहरत। २०. विपदां प्रतिक्रिया कदा चिन्तनीया ? कूपखननं कदा न युक्तम ? २१. परोऽपि को बन्धुः ? बन्धुरपि कः परः ? अत्र दृष्टान्तौ कौ ? २२. 'स पश्यति' कः ? २३. 'वृक्षा सत्पुरुषा इव' कथम ? २४. 'खलः कथं गौरवं याति ? दृष्टान्तः कः ? २५. महतां संसर्गः किं सम्पादयति ? दृष्टान्तं वद ॥

२) सतिसप्तमी—(Locative Absolute)

१) भानावुदिते सति अन्धकारो नश्यति ।

२). गृहे वह्निना सन्दीप्ते सति कूपखननमयुक्तम् ।

३) रामे राज्यं शासति सति देशे सर्वत्र सुभिक्षमासीत् ॥

३) पर्यायाः—

औषधम् ५— भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥

वैद्यः ५—रोगहार्यगदङ्कारो भिषग्वैद्यो चिकित्सके ॥

अविचार्य *in* without giving thought

किञ्च *in* and further

कलित *a* seen

विपद्: *f* adversities

प्रतिक्रिया *f* remedy

अहित: *m* injurious

आरण्यम् *a* forest-born

लोष्टवत् *in* like a lump of earth

आत्मवत् *in* like one's own self

छाया *f* shade

आतप: *m* Sunshine

संसर्ग: *m* contact

अनुषङ्ग *m* connection

सूत्रम् *n* a thread

उन्नतिकारक: *m* leading to exaltation

पद्मपत्रं *n* a lotus leaf

मुक्ताफलं *n* a pearl

| पर्यायसंख्या | नामानि | पृष्ठम् | पर्यायसंख्या | नामानि | पृष्ठम् |
|---|---|---|---|---|---|
| 3 | अमृतम् | 23 | 20 | चन्द्रः | 78 |
| 4 | अन्यः | 47 | 10 | चोरः | 69 |
| 4 | अयोध्या | 17 | 4 | चौर्यम् | 69 |
| 13 | अश्वः | 20 | 25 | जलम् | 35 |
| 4 | आखेरणः | 56 | 2 | जीवन् | 7 |
| 4 | आयुधम् | 114 | 5 | तापसः | 92 |
| 4 | आश्रमः | 92 | 5 | तीरम् | 59 |
| 9 | उलूकः | 99 | 3 | दान्तिः | 105 |
| 2 | उलूखलम् | 53 | 2 | दूतः | 89 |
| 2 | ऋषि | 92 | 11 | देहः | 26 |
| 3 | एकाकी | 47 | 4 | दम्पती | 39 |
| 5 | औषधम् | 116 | 13 | धनम् | 112 |
| 2 | किम् | 7 | 6 | नर्तनम् | 72 |
| 4 | कुक्कुटः | 45 | 6 | नक्षत्रम् | 78 |
| 4 | कुतूहलम् | 76 | 6 | पक्षः | 61 |
| 7 | कृष्णः | 32 | 4 | परतन्त्र | 29 |
| 4 | कोकिलः | 32 | 2 | पनसः | 102 |
| 7 | कोपः | 82 | 2 | पिष्टकम् | 42 |
| 5 | क्षणः | 99 | 3 | पिता | 82 |
| 12 | गजः | 56 | 6 | पिपासा | 23 |
| 6 | गोपः | 10 | 3 | पीतवर्णः | 102 |
| 6 | गौः | 10 | 6 | पुत्रः | 82 |
| 4 | घृतम् | 10 | 6 | प्राणी | 112 |

| पर्यायसंख्या | शब्दाः | पृष्ठम् | पर्यायसंख्या | शब्दाः | पृष्ठम् |
|---|---|---|---|---|---|
| 2 | [illegible] | 69 | 6 | [illegible] | 55 |
| 14 | बुद्धिः | 53 | 5 | [illegible] | 116 |
| 4 | [illegible] | 45 | 3 | [illegible] | 105 |
| 11 | [illegible] | 114 | 3 | [illegible] | 21 |
| [illegible] | [illegible] | 7 | 2 | [illegible] | 105 |
| [illegible] | भूमिः | 110 | 3 | [illegible] | 42 |
| 9 | [illegible] | 42 | 3 | शीतम् | 39 |
| [illegible] | [illegible] | 7 | 13 | शुक्ल. | 31 |
| [illegible] | [illegible] | 59 | 10 | शृगालः | 21 |
| 15 | [illegible] | 105 | 3 | शोकः | 105 |
| 5 | [illegible] | 65 | 10 | [illegible] | 47 |
| 6 | [illegible] | 69 | 6 | [illegible] | 82 |
| 3 | [illegible] | 103 | 11 | [illegible] | 72 |
| 5 | [illegible] | 76 | 5 | [illegible] | 13 |
| 11 | [illegible] | 53 | 37 | [illegible] | 3 |
| 5 | लता | 50 | 4 | [illegible] | [illegible] |
| 2 | वर्णः | 92 | 12 | [illegible] | [illegible] |
| 10 | वानरः | 39 | 5 | स्वतन्त्रः | 29 |
| 3 | विप्रः | 99 | 2 | स्वसा | 65 |
| 3 | विषम् | 23 | 3 | हरितवर्णः | 102 |
| 4 | वियोगः | 105 | 8 | हस्तः | 95 |
| | वृक्षः | 13 | | | |



आहत्य पर्यायपदानि 89

---

## नानार्थ पदानाम् अनुक्रमणिका

(Words having various meanings)


अब्द. Page 45. गो. अद्रि, कुलम् Page 76

1. Usages of Nouns with Adjectives:

(Note that all Adjectives must agree with the Noun in Gender, Case and Number)

Examples:—

| क. विभक्तिः | पुंलिङ्गे Adjective | Noun | स्त्रीलिङ्गे Adjective | Noun |
|---|---|---|---|---|
| प्र | सुगुणः | बालः | सुगुणा | बाला |
| सं प्र | हे सुगुण | बाल | हे सुगुणे | बाले |
| द्वि | सुगुणं | बालं | सुगुणां | बालां |
| तृ | सुगुणेन | बालेन | सुगुणया | बालया |
| च | सुगुणाय | बालाय | सुगुणायै | बालायै |
| प | सुगुणात् | बालात् | सुगुणायाः | बालायाः |
| ष | सुगुणस्य | बालस्य | सुगुणायाः | बालायाः |
| स | सुगुणे | बाले | सुगुणायां | बालायाम् |

नपुंसकलिङ्गे तु प्रथमाद्वितीयाविभक्त्योः 'सुगुणं मित्रम्' इति शेषं पुंलिङ्गवत् ।

ख. 'किम्' शब्दस्य नामपदैः सह प्रयोगः—

| | पुंलिङ्गे | | स्त्रीलिङ्गे | |
|---|---|---|---|---|
| प्र. | कश्चित् | कविः | काचित् | बाला |
| द्वि. | कंचित् | कवि | कांचित् | बालां |
| तृ. | केनचित् | कविना | कयाचित् | बालया |
| च. | कस्माचित् | कवये | कस्यैचित् | बालायै |
| प. | कस्मैचित् | कवेः | कस्याश्चित् | बालायाः |
| ष. | कस्यचित् | कवेः | कस्याश्चित् | बालायाः |
| स. | कस्मिंश्चित् | कवौ | कस्यांश्चित् | बालायाम् |

नपुंसकलिङ्गे तु प्रथमाद्वितीयाविभक्त्योः 'किञ्चित् फलम्' इति। शेषम् अकारान्तपुंलिङ्गवत्॥

2. क. 'तद्, युष्मद् अस्मद् शब्दानां क्रियापदैः सह (भूतकाले Past Tense) प्रयोगः—

प्र. सः पाठम् अपठत्। तौ पाठम् अपठताम्। ते पाठम् अपठन्।
म. त्वं पाठम् अपठः। युवां पाठम् अपठतम्। यूयं पाठम् अपठत
उ. अहं पाठम् अपठं। आवां पाठम अपठाव। वयं पाठम् अपठाम।

ख. लोटि (Imperative Mood) प्रयोगः—

| | | |
|---|---|---|
| प्र. सः पाठं पठतु | तौ पाठं पठतां | ते पाठं पठन्तु |
| म. त्वं पाठं पठ | युवां पाठं पठत | यूयं पाठं पठत |
| उ. अहं पाठं पठानि | आवां पाठं पठाव | वयं पाठं पठाम |

ग. १. प्र. पु. ए. रामः पितरम् अवन्दत
प्र. पु. द्वि. रामः कृष्णः च पितरम् अवन्देताम्
प्र. पु. ब. रामः कृष्णः गोपालश्च पितरम् अवन्दन्त।

२. म. पु. ए. त्वं पितरम् अवन्दथाः
म. पु. द्वि. त्वं रामः च पितरम् अवन्देथाम्[1]
म. पु. ब. त्वं कृष्णः गोपालश्च पितरम् अवन्दध्वम्।

३. उ. पु. ए. अहं पितरम् अवन्दे
उ. पु. द्वि. अहं गोपालश्च पितरम् अवन्दावहि[2]
उ. पु. ब. अहं रामः गोपालश्च पितरम् अवन्दामहि।

*Note*:—1. Verbs must be in Second Person when there is युष्मच्छब्द as the Subject.

2. Verbs must be in the First Person when there is अस्मच्छब्द as the Subject.

३. धातूनां कर्मणि (In the Passive voice) लटि, लङि, लृटि, च प्रथमपुरुषैकवचने रूपाणि ।

| | धातुः | लट् | लङ् | लृट् |
|---|---|---|---|---|
| १. | *(अनु) भू | अनुभूयते | अन्वभूयत | अनुभविष्यते |
| २. | *(अनु) स्था | अनुष्ठीयते | अन्वष्ठीयत | अनुष्ठास्यते |
| ३. | पठ् | पठ्यते | अपठ्यत | पठिष्यते |
| ४. | गम् | गम्यते | अगम्यत | गमिष्यते |
| ५. | दृश् | दृश्यते | अदृश्यत | द्रक्ष्यते |
| ६. | पा | पीयते | अपीयत | पास्यते |
| ७. | कृ | क्रियते | अक्रियत | करिष्यते |
| ८. | लभ् | लभ्यते | अलभ्यत | लप्स्यते |
| ९. | वन्द् | वन्द्यते | अवन्द्यत | वन्दिष्यते |
| १०. | नी | नीयते | अनीयत | नेष्यते |

### 4. Present and Future Participles (in the Passive voice)

Present and future Participles are formed by adding मान to the base.

*Ex.* १. पठ्य + मानः = पठ्यमानः

२. पठिष्य + माणः = पठिष्यमाण.

---

*भू and स्था though intransitive, become transitive when used with अनु.

५. प्रश्नाः (Questions)

I. Correct the following giving reasons

१. अहं रामः च उषसि प्रबुध्य पाठान् पठतः ।

२. युवां गुरुः च मद्रपुरीं अगच्छन् ।

३. कश्चित् ग्रामे एका वणिक् अवर्तत् ।

४. धीमान् बालं गुरुः अपृच्छत् ।

५. कश्चित् नारी बालेन सह तिष्ठति ॥

II. Join the following words stating kind of सन्धि

| | | | | | |
|---|---|---|---|---|---|
| १) भूमौ | + अपतत् | ६) इति | + इव |
| २) तस्मै | + अयच्छत् | ७) सः | + तत्र |
| ३) शिष्यः | + अनमत् | ८) सः | + अवदत् |
| ४) बालाः | + तत्र | ९) गुरुः | + आगच्छति |
| ५) इति | + एवम् | १०) कश्चित् | + बालः |

III. Rewrite the following using Active Participles

१) पथि गच्छन् सः रक्षापुरुषैः गृहीतः ताडितः दण्डाधिपस्य समीपं नीतश्च ।  २) मया समस्या पूरिता ।

३) श्रीरामः सलक्ष्मणः विश्वामित्रेण तत्र नीतः ॥

IV. Give the opposite words.

१) स्मरति  ३) सूर्योदयः  ५) विकसित मुखः

२) रामेण सह  ४) सन्तुष्टः  ६) अधोमुखः

V. Give one word for.

१) लोष्ठः इव  २) सः इव  ३) चारोः भावः

शुभं भूयात् । समस्तसन्मङ्गलानि सन्तु ॥ 'जय विजयी भव'